लोके वस्तुतः सतां वस्तुनामतिदूरादनुपलब्धिः । यथा तीरा[1]न्तरपतितानामनुपलब्धिः । सामीप्यादनुपलब्धिः । यथा अक्षिगतस्य वस्तुन अग्रहः । इन्द्रियघातादनुपलब्धिः । यथा बधिरान्धौ शब्दरूपे नोपलभेते । मनोऽनवस्थानादनुपलब्धिः । यथा अन्यालम्बनचित्तः [पुरोवर्तिनं] विषयं नोपलभते । सौक्ष्म्यादनुपलब्धिः । यथा धूमोष्मत्रुटिनीहार[परमाणवः] गगनगताः सूक्ष्मा नोपलभ्यन्ते । व्यवधानादनुपलब्धिः । यथा कुड्येन व्यवहितं वस्तु नोपलभ्यते । अभिभवादनुपलब्धिः । यथा सूर्योद्गमे नक्षत्रं चन्द्रश्च न प्रकाशते । समानाभिहारादनुपलब्धिः । यथा माषराशिगतं माषधान्यं समजातीयं, दुर्ज्ञानम् । एवमष्टधा सतां वस्तुनामनुपलब्धिः । असतामपि वस्तुनां चतुर्धा अनुपलब्धिः । (१) प्रागभावादनुपलब्धिः । यथा मृदा भाजनं [यदा] न कृतम्, तदा भाजनं नोपलभ्यते । (२) प्रध्वंसाभावादनुपलब्धिः । यथा घटो ध्वस्तो न पुनरुपलभ्यते । (३) इतरेतराभावादनुपलब्धिः । यथा गवि अश्व[त्वं] न दृश्यते, अश्वे गो[त्वं] न दृश्यते । (४) अत्यन्ताभावादनुपलब्धिः । यथा अनीश्वरस्य द्वे शिरसी त्रयो बाहवः । एवं द्वादशविधाः सतामसताञ्चानुपलब्धयः । तस्माद् यदुक्तं भवता प्रकृतिपुरुषौ न स्तः, अनुपलब्धत्वाद् इति । एतन्न युज्यते ॥ ७ ॥

पर आह । यदि प्रकृतिपुरुषौ नोपलभ्येत । द्वादशानां मध्ये केन नोपलभ्येते । समाधीयते । एकस्मात्कारणान्नोपलभ्येते । किमेकं कारणम् । आर्यया प्रदर्शयति ।

1. lit. अमुष्मिन् तीरे पतितानाम्.

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धिः ।
महदादि तच्च कार्यं प्रकृतिविरूपं सरूपञ्च[1] ॥ ८ ॥

Ch: प्रकृतिः सौक्ष्म्यान्नोपलभ्यते, न कारणमुपलब्धमसद् इति ।
महदादि तस्य कार्यं प्रकृतिविरूपं सरूपञ्च ॥

प्रकृतिः सौक्ष्म्यान्नोपलभ्यते, न [2]कारणमुपलब्धमसदिति । इति । प्रधानं सदेव नोपलभ्यते । सौक्ष्म्याद् [1249, c. 3] यथा धूमादि[परमाणवः] सौक्ष्म्यान्नोपलभ्यन्ते । तथा प्रधानमपि । न तु द्वितीयं शिरः तृतीयो बाहुरिवात्यन्तमसत्त्वान्नोपलभ्यते । पर आह । यदि नोपलभ्यते । कथं तर्हि ज्ञायते अस्तीति । उच्यते । कार्यं प्रतीत्य स्वकारणं दृश्यते । कार्यं प्रधानकृतमिति सामान्यतो दृष्टानुमानात्प्रधानमस्तीति ज्ञायते । पर आह । किं तत्कार्यम् । उच्यते । महदादि तस्य कार्यम् । प्रधानान्महानुत्पद्यते । महत अहङ्कारः । अहङ्कारात्पञ्चतन्मात्राणि । पञ्चतन्मात्रेभ्यः षोडश [विकारा] उत्पद्यन्ते । महदादि कार्यं त्रिगुणं दृश्यते । अतः प्रधानं त्रिगुणमिति ज्ञायते । प्रकृतिविरूपं सरूपञ्चेति । कार्यं द्विविधं (१) प्रकृतिविरूपं (२) प्रकृतिसरूपञ्चेति । यथा एकस्य द्वौ सुतावुत्पन्नौ । एकः पितृसरूपः अपरस्तु [पितृ] विरूपः । [एवं] एतत्कारणकं कार्यं प्रकृतिसरूपं विरूपञ्च । इति पश्चाद्विस्तरेण वक्ष्यते । ईदृशं कार्यमस्मिन् शास्त्रे ॥ ८ ॥

अत्र पृच्छामः । यदि शिष्या नियो[3]ज्याः, किं प्रधानादौ [कार्यं] सत्, उतासत् अहोस्वित् सच्चासच्च । कथमेवम् । आचार्याणां प्रतिपत्तिवैषम्यात् । केचिदाचार्या वदन्ति मृत्पिण्डादौ घटादि कार्यमस्ति । इति । वैशेषिका वदन्ति कार्यं प्रागसत् पश्चात् संभवति । इति । शाक्यैः पुनरुक्तं मृत्पिण्डे घटो नैवास्ति न च नास्ति । इति । एभिस्त्रिभि [स्त्रेधा] उक्तत्वात् । समाधीयते । प्रथमं शाक्यमतं खण्डयामः । पश्चाद्वैशेषिक[मतं] खण्डयामः । यदाहुः शाक्याः न सन् न चासन्निति ।

1. Three eds. read न कारणाभावान्नोपलभ्यत इति.
2. Paramārtha leaves untranslated 'कार्यतस्तदुपलब्धि' of the kārikā and also seems to read तस्य कार्यं for तच्च कार्यं.
3. K'e-tsê नियोज्य ?

तन्न युज्यते । स्वभावतो विरोधात् । यदि न सन्निति । तदा सिद्धोऽसन्निति । यदि नचासन् इति । तदा सिद्धः सन्निति । अयं संश्चासंश्चेति न सिद्ध्यति । एकत्र मिथो विरोधात् । यथाह कश्चित्, अयं पुरुषो मृतो जीवति चेति[1] । एतद्वचनं मिथो विरुद्धमिति न साधीयः । शाक्यवचनमप्येवम् ।

(त्रिपिटक उक्तम्[2] । अयं कल्पो न युक्तः । कुतः । शाक्यानामेतद्वादासंभवात् । यदा ते वदन्ति न सन्निति । [तदा] नासद्वादः । [यदा] वदन्ति न चासन्निति । [तदा] न सद्वादः । सदसद्वादमुक्तत्वात् खण्डनं न सिद्धम् ।)

अधुना वैशेषिकमतं खण्डयामः । वैशेषिका भ्रान्ताः[3] । अस्मन्मते तु कारणे कार्यं नियतमिति पञ्चकारणानि प्रदर्शयति । कानि पञ्चकारणानि ।

असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ ९ ॥

Ch: असदकरणाद् अवश्यमुपादानग्रहणात् सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात् कारणमनुसृत्य कार्यभावात् सत्कार्यमुच्यते ॥

(१) असदकरणादिति । लोके हि असतः करणं न सिद्ध्यति । यथा सिकताभ्यस्तैलम् । सतः करणं शक्यते । यथा तिलपीडनेन तैलोद्गमः । यदि कार्य-

1. This example is given in MV. in connection with the refutation of the opinion of [ā]jivakas who maintain that the effect is both existent and non-existent in the cause. Dr. Takak. in a foot-note, relying upon the commentary on the Śataśāstra (translated in 608 A D. and not included in the editions of the Chinese Tripiṭaka) tells us that the opinion referred to here as that of Śākyas, ought to be that of Ṛsabhas. Cf. H. Ui: Vaiśeṣika Philosophy p. 54, n. 3, where a similar view is recorded as that of the Jñātiputras.

2. This is a note by Paramārtha himself. (Takak.)

3. Chinese text reads *yeh chih.* Three eds. *hsieh, bhrānta.* I have preferred the latter reading.

[1247] मत्र नास्ति । ततो नोद्भवेत् । पश्यामः खलु महदादि प्रधानाज्जातम्[1] । अतो ज्ञायते प्रधाने महदाद्यस्तीति । (२) अवश्यमुपादानग्रहणादिति । यदि कश्चित्कार्यं प्रार्थयते । अवश्यं तन्निमित्तमुपादत्ते यथा कश्चिन्मन्यते श्वो मम गृहे ब्राह्मणा भोक्तारः । अतोऽद्य पयो गृह्णामीति[2] । यदि पयसि दधि न स्यात् । कुतो न जलं गृह्णाति । कार्यार्थिना उपादनग्रहणाज् ज्ञायते प्रधाने महानस्तीति । (३) सर्वसंभवाभावादिति । यदि कारणे कार्यं नास्ति । तदा सर्वं सर्वमुत्पादयेत् । तृणपाषाणवालुकादीनि सुवर्णरजतादीन्युत्पादयेयुः । एतत्कार्यासंभवाज् ज्ञायते हेतौ कार्यमस्तीति । (४) शक्तस्य शक्यकरणादिति । यथा कुलालः सज्जोपकरणो मृत्पिण्डात् [शक्यं] घटशरावादि रचयति । न तु तृणवृक्षादिभ्यो घटं शरावं [3]वा । इति प्रधानं शक्त करोति महदादि । अतः प्रधाने महदाद्यस्तीति ज्ञायते । (५) [4]कारणमनुसृत्य कार्यभावादिति । यज्जातीयं कारणं कार्यमपि एवंजातीयकम् । [5]यथा यवाङ्कुरोऽवश्यं यवजातिमनुसरति । यद्यसत्कार्यम् । तदावश्यं कार्यं कारणविरूपं स्यात् । तथा सति यवान्माषाद्यङ्कुरः सिद्ध्येत् । एवमसंभवाज् ज्ञायते सत्कार्यम् । वैशेषिकादयो वदन्ति कारणे कार्यं नास्तीति । एतन्न युज्यते । अतो ज्ञायते कारणे कार्यं नियतमिति ॥ ९ ॥

अन्तराप्रश्नं परिसमाप्य पूर्वोक्तार्थः पुनः प्रस्तूयते प्रकृतिविरूपमिति । वैरूप्यं नवविधम् ।

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

Ch. हेतुमदनित्यमनेकमव्यापि सक्रियं लिङ्गम् ।
सावयवमाश्रितं परतन्त्रं व्यक्तम् [एवं] प्रकृतिविभिन्नम् ॥

1. Ibid. जात is omitted.
2. Cf. Tattvas. pañj. p. 19 (Gos).
3. Three eds. add न तृणवृक्षेभ्यः.
4. Ibid. कारण omitted.
5. Ibid. यथा omitted.

(१) हेतुमदिति । महदादि पञ्चभूतपर्यन्तं सर्वं हेतुमत् । [तथा हि] प्रधानं महतो हेतुः । महानहङ्कारस्य हेतुः । अहङ्कारः पञ्चतन्मात्राणां हेतुः । पञ्चतन्मात्राणि इन्द्रियादिषोडशतत्त्वानां हेतवः । प्रधानन्तु न तथा । हेतुतोऽनुत्पन्नत्वात् । अत उक्तं विरूपमिति । (२) अनित्यमिति । महदादि प्रधानादुत्पन्नम् । उत्पन्नत्वाद् इदमनित्यम् । अनित्यं द्विविधम् (१) अचिरकालावस्थाय्यनित्यं (२) क्षणिकानित्यमिति । यावत्परस्परविरोधिप्रत्ययो नागतः तावत्कालं [विद्यमानं] अचिरकालावस्थायि यथा पर्वतारण्यादि, अग्निभयेऽनागते सति तदल्पकालं तिष्ठति[1] अग्निभये आगते तु पञ्चमहाभूतादि पञ्चतन्मात्रेषु लीयते । पञ्चतन्मात्राणि अहङ्कारे लीयन्ते । अहङ्कारो महति लीयते । महान् प्रधाने लीयते । अत इदं महदाद्यनित्यम् । न तथा प्रधानम् । नित्यत्वादलीनत्वाच्च । (३) अनेकमिति । महदादि अनेकम् । प्रतिपुरुषं वैषम्यात् । अहङ्कारोऽप्येवम् । प्रधानन्त्वेकमेव बहुपुरुषेषु [1247 *c*, 2.] साधारणत्वात् । (४) अव्यापीति । प्रधानपुरुषौ सर्वत्र पृथिव्यामन्तरिक्षे दिवि च व्याप्नुतः । महदादि कार्यन्तु न तथा । असर्वगतत्वात् । तस्मात्प्रकृतिविभिन्नम् । (५) सक्रियमिति । महदादिकार्यं [2]संसारसुतिपादयिषु त्रयोदशविधकरणैः[3] सूक्ष्मशरीरं संसारयति संसारे, विकासयति संकोचयति गमयति आगमयति च । न तथा प्रधानम् । संकोचविकासासंभवात् । (६) लिङ्गमिति । महदादिविकारः प्रधानं प्रति निवृत्तश्चेत् तदा नोपलभ्यते । इदं लिङ्गमाख्यायते । यथा पञ्चमहाभूतादि पञ्चतन्मात्रेषु लयं प्राप्नोति । पुनर्महाभूतादि नोपलभामहे । यावन्महान् प्रधाने लीयते । महानपि नोपलभ्यते । न तथा प्रधानम् । लयप्राप्त्यभावात् । (७) सावयवमिति । महदादि सर्वं सावयवम् । अवयवानां भेदात्[4] । न तथा प्रधानम् । नित्यत्वाद् अवयवानामभावाच्च । (८) आश्रितमिति । यन् महान् प्रधानमाश्रितः । अहङ्कारो महान्तमाश्रितः । पञ्चतन्मात्राणि अहङ्कारमाश्रितानि । पञ्चमहाभूतादिषोडशकः सर्वः पञ्चतन्मात्राण्याश्रितः ।

---

1. *Ting-chu* literally means 'to cease'.
2. lit. जननमरण
3. lit. करणाश्रयेण
4. lit. वैषम्यात्

न तथा प्रधानम् । अन्येनानुत्पन्नत्वात् । (९) परतन्त्रमिति । महदादेः प्रधानादुत्पन्नस्य कार्यस्यास्वतन्त्रत्वात् । यथा पितरि जीवति पुत्रो न स्वतन्त्रः । न तथा प्रधानम् । कारणस्य परतन्त्रत्वाभावात्[1] । अनेन नवविधेन कारणेन व्यक्ताव्यक्तयोर्वैषम्याद् विरूपमित्युक्तम् ॥ १० ॥

वैरूप्यमभिधाय सारूप्यमिदानीमुच्यते । प्रकृतिसरूपमित्यार्यया प्रदर्शयति ।

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ ११ ॥

Ch: त्रिगुणमविवेकि .... ।
[एवं] प्रधानं व्यक्तञ्च सरूपम्, पुमान् सारूप्यवैरूप्यविपरीतः ॥

सारूप्यं षड्विधम् । [तत्र] प्रथमं त्रिगुणमिति । व्यक्तं त्रिगुणम् । व्यक्तमिति यदुत महानहङ्कारो यावत्पञ्चमहाभूतानि । एतत्त्रयोदशविधं सर्वं [2]सत्त्वरजस्तमोरूपत्रिगुणम् । व्यक्तस्य त्रिगुणत्वाद् अव्यक्तं त्रिगुणमिति ज्ञायते । कार्यस्य कारणाव्यतिरिक्तत्वात् । यथा कृष्णतन्तुभ्यः कृष्णपटः । कार्यकारणयोः सरूपत्वाद् व्यक्तं त्रिगुणं ज्ञायते । व्यक्तस्य च प्रधानकृतत्वात् प्रधानं त्रिगुणम् इति व्यक्ताव्यक्तयोः सारूप्यमुक्तम् । (२) अविवेकीति । व्यक्तं गुणा इति विवेक्तुं न पार्यते । यथा गौरश्वश्चानेकात्मकौ । न तथा गुणा व्यक्तञ्च[3] । प्रधानं त्रिगुणमप्येवं समानमविवेकि इति व्यक्तमव्यक्तञ्च सरूपम् । (३) विषय इति । महदादि व्यक्तं पुरुषस्योपभोग्यत्वाद् विषय इत्युच्यते । प्रधानमपि तथा । पुरुषस्योपभोग्यत्वात् । (४) सामान्यमिति । महदादि व्यक्तं [1247, *c*. 3] सर्वपुरुषाणां साधारणोपयोगि । यथा[4] एकस्या दास्या बहवः प्रभवः सन्ति । [सर्वेषां] साधारण्येन नियोज्यत्वात् । तथा प्रधानमपि सर्व-

---

1. Read '*shu*' for '*wei*' (Takak.)
2. lit. सुखदुःखमोह.
3. lit. गुणा व्यक्तञ्च, तेषां भावो न तथा.
4. गणिकावत्—MV. मूल्यदासीवत्. GB. मल्लदासीवत्—Jaya. घटवत्—STK.

पुरुषाणां साधारणोपयोगि । तस्मादुक्तं सरूपमिति । (५) अचेतनमिति । महदादि व्यक्तं सुखदुःखमोहभेदान्न विजानाति । ज्ञानस्य पुरुषमात्रलब्धत्वात् । पुरुषव्यतिरिक्ता धर्मा अचेतनाः । तथा प्रधानमपि । व्यक्तमव्यक्तञ्च सममचेतनम् । तयोर्भावः सरूपः । ([1]६) प्रसवधर्मि [एवं] प्रधानं व्यक्तञ्च सरूपमिति । महानहङ्कारं प्रसूते । अहङ्कारः पञ्चतन्मात्राणि प्रसूते । यावत्पञ्चमहाभूतानि । प्रधानं महान्तं प्रसूते इति व्यक्ताव्यक्तयोः सारूप्यम् । पुमान् सारूप्यवैरूप्यविपरीत [2]इति । व्यक्ताव्यक्तयोः षड्विधं सारूप्यमस्ति । पुरुषस्य नैतत्सारूप्यमस्ति । तस्मात्सारूप्यविपरीतः वैरूप्यविपरीतश्चेति । व्यक्ताव्यक्तयोर्नवविधं वैरूप्य[मुक्त]म् । तत्राष्टविधविपरीतः पुमान् । अत उक्तं वैरूप्यविपरीत इति । पुरुषाणामनेकत्वान् न प्रधानसारूप्यम् ॥ ११ ॥

पर आह । व्यक्तमव्यक्तञ्च त्रिगुणमुक्तम् । इमे त्रयो गुणाः किमात्मकाः । आर्यया उत्तरयति ।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ १२ ॥

---

1. This number is according to three eds. The text reads च or अपि

2. MV. and GB. commenting on *tathā ca pumān*, say that *puruṣa* is akin to *pradhāna* in respect of its being different from *vyakta* on the 9 items enumerated in the verse 10 including *anekatva*. In other words Puruṣa, like Pradhāna is *one*. This is quite contrary to the text since the manifoldness of Puruṣa is maintained in the K. 18. Chc. is, therefore, right in saying that Puruṣa is reverse to the similarities mentioned in K. 11 and to the dissimilarities mentioned in K. 10 excepting *anekatva*. This point is noticed by STK. and Jaya. The theory of oneness of the Nature and manifoldness of the Spirit is referred to in the Upāyahṛdaya p. 7 (GOS.)

Ch: प्रीत्यप्रीति .... ।
.... मिथुनवृत्तयश्च त्रिगुणधर्माः ॥

प्रीत्यप्रीतिविषादात्मका इति । सत्त्वं रजस्तम इतीमे त्रयो गुणाः । प्रीतिः सत्त्वस्यात्मा । रजसोऽप्रीतिरात्मा । तमसो विषाद आत्मा । इति त्रयः स्वभावा दृश्यन्ते । प्रकाशप्रवृत्तिनियमार्था इति । किं कुर्वन्ति इमे त्रयो गुणाः । आद्यः प्रकाशं प्रभां कर्तुं समर्थः । मध्यमस्तु जननं प्रवृतिं कर्तुं समर्थः । अन्तिमः नियमं बन्धं कर्तुं समर्थः । इदं त्रिगुणान्वयं कार्यम् । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च त्रिगुणधर्मा इति । के धर्मास्त्रिगुणस्य । तेषां धर्माः पञ्चविधाः । (१) अन्योन्याभिभवेति । सत्त्वमुत्कटञ्चेद् रजस्तमसी अभिभवति । यथा महान् सूर्यरश्मिश्चन्द्रनक्षत्रादीनभिभवति । रज उत्कटञ्चेत् सत्त्वतमसी अभिभवति । यथा प्रकाशमानः सूर्यरश्मिः नक्षत्राणि चन्द्रञ्चाभिभवति । तम उत्कटञ्चेद् रजस्सत्त्वे अभिभवति । यथा सूर्यस्य महता प्रकाशेन नक्षत्राणां चन्द्रस्य च प्रकाशो न दृश्यते । (२) अन्योन्याश्रयेति । इमे गुणाः परस्पराश्रयाः[1] सर्वकार्यकरणसमर्थाः । यथा त्रिदण्डी परस्पराश्रया [2]कुण्डिकादीनवष्टभ्नाति । (३) अन्योन्यजननेति । कदाचित्सत्त्वं रजस्तमसी जनयति । कदाचिद् रजस्सत्त्वतमसी जनयति । कदाचित्तमो रजस्सत्त्वे जनयति । यथा त्रयः पुरुषाः परस्परमाश्रयन्तो युगपदेकमर्थं कुर्वन्ति । तथा महदादिस्था गुणाः परस्परमाश्रयन्तः संहत्य जननमरणे कुर्वन्ति । (४) अन्योन्यमिथुनेति । सत्त्वं[1248] कदाचिद्रजसा मिथुनं, कदाचित् तमसा मिथुनम् । रजः कदाचित्सत्त्वेन मिथुनं, कदाचित् तमसा मिथुनम् । एवं तमोऽपि कदाचित्सत्त्वेन मिथुनं, कदाचिद्रजसा मिथुनम् । यथोक्ता गाथा व्या[3]समहर्षिणा ।

रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनम् रजः ।
उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ॥ इति ।

---

1. Read '*i*' for '*szu*' (Takak).
2. Read '*kuan*' for '*kuan*' (Takak).
3. Po-so. = व्यास (Takak). This verse is cited in MV. and GB. तथा चोक्तं विष्णुगीतायाम्—Jaya.

Chinese reads : सत्त्वं रजसा मिथुनं रजःसत्त्वेन मिथुनम् । कदाचित्सत्त्वरजसी तमसा मिथुनीभवतः ॥

(५) [1]अन्योन्यवृत्तीति । इमे त्रयो गुणाः अन्योन्यमर्थं कुर्वन्ति । यथा राजकुलस्त्री सुप्रियरूपशीला । अयं सत्त्वगुण उच्यते । एतत्सत्त्वपरिणतं रूपं भर्तुर्बन्धोश्च प्रीतिं करोति । इदं स्वार्थकरणमुच्यते । [सैव] सर्वासां सपत्नीनां शोकं जनयति । इदमन्यार्थकरणमुच्यते । अन्येषां विषादमपि जनयति । यथा दास्यादयः सदा तत्परिचर्याखिन्ना मोचनमलभमाना विषादाविष्टचित्ता भवन्ति । इदमुच्यते अन्यार्थजननम् । इदमेव सत्त्वगुणस्य स्वपरार्थकरणमुच्यते । रजः स्वपरार्थं जनयति । यथा कश्चिच्चोरो राजकुलस्त्रियं बध्नाति । तदा राजवंश्यो ऽश्वारूढो दण्डं गृहीत्वा आगम्य परित्रायते । राजवंश्यो रजःपरिणतः । राजवंश्यो भयगोचरोऽपि स्त्रियः अहं मोचनं लप्स्ये इत्यानन्दं जनयति । इदमन्यार्थजननमुच्यते । चोरस्य निग्रहात् शोकं जनयति । इदमुच्यते स्वार्थजननम् । अन्ये चोरा राजदर्शनात् स्थाणुवन्न चलन्ति । इदमुच्यतेऽन्येषां मोहजननम् । रजः स्वपरार्थं जनयतीत्युक्तम् । तमः स्वपरार्थं जनयति । यथा महान् घनः कृष्णमेघः विद्युदादीनारभते । मेघस्तमःपरिणतः । सर्वे कृषीवला धा[2]न्योपजीविनो मोदन्ते । इदमुच्यतेऽन्यार्थजननम् । मोहमपि जनयति । यथा काचिद्युवतिः भर्तृवियुक्ता इमं मेघं विद्युतञ्च दृष्ट्वा खिद्यते भर्ता न प्रतिनिवृत्त इति । स्त्रियो मोहं जनयति [मेघ] इतीदमुच्यते स्वार्थजननम् । शोकमपि जनयति । यथा वणिजः पथि वर्तमानाः संक्लिन्ना भारवहनासमर्था खिन्नहृदया भवन्ति । इदमुच्यतेऽन्यार्थजननम् । एवं पञ्चविधास्त्रिगुणान्वया धर्माः ॥ १२ ॥

किञ्चास्ति गुणानां लक्षणम् ।

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥

1. STK. and Candrikā do not treat *anyonyavṛtti* as a separate function of guṇas. MV. GB. and CHC. all agree one another in explaining this function to some extent.
2. Three eds. read धान्यवापिनः

Ch : सत्त्वं लघुप्रकाशकलक्षणमिष्टं[1] रज उपष्टम्भकचललक्षणमिष्टम् ।
तमो गुरुवरणकलक्षणमिष्टं, प्रदीपवद्विरुद्धसंयोगः ॥

सत्त्वं लघुप्रकाशकलक्षणमिष्टमिति । लघु सूक्ष्मम् । प्रकाशकं प्रदीपकम् । तत् सत्त्वमाख्यातम् । सत्त्वमुत्कटश्चेत् सर्वाणीन्द्रियाणि लघूनि मृदूनि विषयग्रहणसमर्थानि भवन्ति । तदा मन्तव्यं सत्त्वमुत्कटमिति । रज उपष्टम्भकचललक्षणमिष्टमिति । उपष्टम्भकमुन्मनः अन्याविगणयितृ । यथा मत्तगजः कलहं मृगयमाणः द्विषन्तं गजमागतं स्थगयते । रज उत्कटश्चेत् तदा मनुष्यः [1248 c.2] सदा कलहं मृगयते । सदा चलचित्त एकत्रावस्थानासमर्थश्च भवति । तदा मन्तव्यं रजोगुण उत्कट इति । तमो गुरुवरणकलक्षणमिष्टमिति । तमोगुणो यद्युत्कटः, [तदा] सर्वशरीरं गुरु । इन्द्रियाणि [तमो] वृतत्वाद् विषयग्रहणासमर्थानि । तदा मन्तव्यं तमो गुण उत्कट इति । पर आह । यदि गुणाः परस्परविरुद्धाः द्विष्टकुलवत् । कथमेकां वृत्तिं कुर्वन्ति । उच्यते । सत्यमेवं गुणाः परस्परविरुद्धाः । [तथापि] एकपुरुषतन्त्रस्यास्वतन्त्रत्वाद् युगपदेकां वृत्तिं लभन्ते । यथा प्रदीपार्थं मिथो विरुद्धानां संयोगः । प्रदीपार्थं हि त्रयः पदार्था [मिथो विरुद्धा अपि] संयुज्यन्ते । तैलवर्तिकयोर्विरुद्धः अग्निः । तैलमपि अग्निवर्तिकयोर्विरुद्धम् । एवमपि मिथो विरुद्धाः पदार्थाः पुरुषार्थं वृत्तिं कुर्वन्ति । तथा त्रयो गुणा अपि विरुद्धस्वभावत्वेऽपि वृत्तिं कुर्वन्ति ॥ १३ ॥

पर आह । [2]षट् सारूप्याणि पूर्वमुक्तानि । [तत्र] एकविधमुपलब्धं मया । अवशिष्टानि पञ्च नोपलब्धानि । त्रैगुण्यं साधितम् । अवशिष्टानि पञ्चापि साधयितव्यानि । आर्ययोत्तरमाह ।

अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात् ।
कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धम् ॥ १४ ॥

1. Read '*wei*' for 'chê' in confirmity with the commentary. (Takak).
2. Read 'lu' for 'i' (Takak).

Ch: अविवेक्यादिः सिद्धो [1]गुणाद्विपर्ययाभावात् ।
कार्यगुणः कारणगुणमनुसरति [अतः] अव्यक्तं सिद्धम् ॥

अविवेक्यादिः सिद्ध इति । अविवेक्यादयः पञ्च धर्मा यथापूर्वमुक्ता व्यक्ते सिद्धाः प्रधानेऽपि सिध्यन्ति । ततः सिद्धत्वात्कार्यस्य । गुणाद्विपर्ययाभावादिति । अमी अविवेक्यादयः पञ्चधर्मा व्यक्ते सिद्धत्वात् प्रधानेऽवश्यं सन्तीति ज्ञायते । कथमेवम् । त्रैगुण्यात् । अपृथक्स्थायि त्रैगुण्यञ्चेत् । [तदा] मिथोऽविवेकीति ज्ञायते । यद्यविवेकि, तदा विषय इति ज्ञेयम् । यदि विषय इत्युच्यते । तदा सामान्यं ज्ञेयम् । यदि सामान्यं स्वीक्रियते, ततः अचेतनं ज्ञायते । यदि विषयः, यदि सामान्यम्, यदि चाचेतनम् । ततः प्रसवधर्मि ज्ञायते । यदि ज्ञायते इमे षड् धर्मा व्यक्ते सन्तीति । तदा ते षड् धर्माः प्रधानेऽपि सन्तीति ज्ञायते । कथमेवं ज्ञायते । [2]विपर्ययेऽभावात् । मूलप्रकृतिविवर्जितश्चेत् तदा कार्यं षड्धर्मं न स्यात् । यथा तन्तुतिरस्कृत[श्चेत्], तदा नास्ति पटो व्यतिरिक्तः । यत्रैव पटस्तत्रैव तन्तवः । तन्तुपटौ ह्यविविक्तौ । कार्यं कारणाधीनम् । कार्यकारणे च न विविक्ते । कार्य-गुणः कारणगुणमनुसरति [अतो]ऽव्यक्तं सिद्धमिति । लोकेऽस्मिन् सर्वे कार्यगुणा नियमेन कारणगुणमनुसरन्ति । यथा कृष्णतन्तुकृतः पटः । स हि नियमेन तन्तुकार्ष्ण्यमनुसरति । तथा व्यक्ताद्यपि त्रैगुण्यात् पञ्चधर्म सिद्धम् । कार्यस्य षड्धर्मत्वाज् ज्ञायतेऽव्यक्तेऽपि षड् धर्माः सन्तीति ॥ १४ ॥

पर आह । लोके यदि वस्तु नोपलभ्यते । तदा तद्वस्तु असदिष्यते । यथा द्वितीयं शिरः । [1248,c.3] तथा प्रकृतिरपि नोपलभ्यते । कथं ज्ञायते सास्तीति । उच्यते । हिमवतो भारस्तत्परिमाणञ्च न ज्ञायते । नहि वक्तुं शक्यते परिमाणं नास्तीति । तथा प्रकृतिरपि । केन हेतुना ज्ञातुं शक्यते अस्तीति ।

भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ १५ ॥

1. or गुणविपर्यय, etc.
2. lit. यदि विपर्ययः तदाभावात्. Here *mūlaprakṛti* = *traiguṇya*, hence *mūlaprakṛtivivarjita* = *traiguṇyavivarjita*.

Ch: भिन्नजातीनां सपरिमाणत्वात् समस्वभावत्वात् शक्ति[तः] प्रवृत्तेश्च ।
कारणकार्यविभागाद् वैश्वरूप्यस्याविभागात् ॥

अस्ति प्रधानम् । कथं ज्ञायते । भिन्नजातीनां सपरिमाणत्वादिति । लोकेऽस्मिन् [1]यद्वस्तु सकर्तृकम् । तद्वस्तु परिमाणपरिच्छिन्नम् । यथा कुलालः सपरिमाणान्मृत्पिण्डात् परिच्छिन्नपरिमाणं घटं कुरुते । अयं घटो यदि निष्कारणः । [तदा] घटः परिच्छिन्नपरिमाणो न स्यात् । घटश्च नोत्पन्नः स्यात् । दृश्यते तु घटः परिच्छिन्नपरिमाणः । तस्माज् ज्ञायते सकारणमिति । यथा तन्तुनिष्पन्नं पटादिकम् । तथा सर्वपदार्थोऽपि । एषु धर्मेषु (=तत्त्वेषु) महदादि व्यक्तमपि परिच्छिन्नपरिमाणम् । किं [तत्] परिच्छिन्नं परिमाणम् । महानेकः, एकोऽहङ्कारः, पञ्च तन्मात्राणि[2], एकादशेन्द्रियाणि, पञ्च महाभूतानि । [एवं] व्यक्तमिदं सपरिमाणं दृष्टमस्माभिः । इति सामान्यतो दृष्टानुमानेन[3] ज्ञायते प्रधानमवश्यमस्तीति । यदि प्रधानमसत्, व्यक्तमिदमपरिच्छिन्नपरिमाणं स्यात् । किञ्च पुनरसद्भवेत् । समस्वभावत्वादिति । यथा चन्दनखण्डः[4] । तत्खण्डेषु बहुष्वपि चन्दनस्वभावोऽन्तत एकः । तथा व्यक्तमपि । महदादिषु विभिन्नेष्वपि त्रैगुण्यस्वभाव एकः । तेषामेकस्वभावत्वाज् ज्ञायते तत् सर्वं सकारणमिति । अतो ज्ञायते [5]प्रधानमस्तीति । शक्ति[तः] प्रवृत्तेश्चेति । [6]यो यत्र शक्तो भवति । स तत्र प्रवर्तते । यथा कुलालो घटघटिका[करण]शक्तो घटघटिकयोः प्रवर्तते । न पटादौ प्रवर्तते । इयं घटिका उत्पद्यमाना शक्तिमाश्रित्य सिध्यति । सा च शक्तिर्नियमेन साश्रया यदुत कुलालाश्रया । तथा व्यक्तमपि । व्यक्तस्यास्ति प्रवृत्तिः । इयं प्रवृत्तिः शक्त्या सिद्ध्यति । सा च शक्तिः साश्रया । तदाश्रयः प्रधानम् । शक्ति[तः] प्रवृत्तेः ज्ञायते प्रधानमस्तीति । कारणकार्यविभागादिति । लोके कारणकार्यविभागश्च

1. lit. यदि.
2. lit. पञ्चतन्मात्राणि पञ्च.
3. Read '*pi*' for '*szu*' (Takak).
4. यथा व्रतधारिवटुः—G B. भूषणादि—M V.
5. Ming ed. reads तत्प्रधानमिति.
6. lit. यद्यत्र शक्तो भवति । तदा अत्र प्रवर्तते ।

दृश्यते । यथा मृत्पिण्डः कारणम् । घटादिकं कार्यम् । अयं घटो जलतैलादि-धारणे समर्थः । न तु मृत्पिण्डः । अयं कारणकार्यविभागः । तन्तुपटावप्येवम् । तथा महदादि व्यक्तमवश्यं कार्यम् । एतत्कार्यं दृष्ट्वा जानीमो व्यतिरिक्तं कारणं विरूपमस्तीति । तस्मादस्ति प्रधानम् । वैश्वरूप्यस्याविभागादिति । किञ्चास्ति कारणान्तरम् अस्ति प्रधानं वस्तुत इति ज्ञापयितुम् । वैश्वरूप्यस्येति । त्रिविधो हि लोको यदुत पृथिवी अन्तरिक्षं द्यौरिति । प्रलयकाले सर्वो लोकोऽविभक्तः । पञ्चमहाभूतानि एकादशेन्द्रियाणि पञ्चतन्मात्रेषु विलीय अविभक्तानि । यावन्महान् प्रधाने विलीय [1249] अविभक्तः । इदं व्यक्तमिदं प्रधानमिति [विविच्य] न वक्तुं शक्यते । प्रलयकाले व्यक्तस्याभावात्प्रधानमपि अविद्यमानं भवेत् । प्रधानं यदि नास्ति । संसारोऽपि न भवेत् । नैतद्युज्यते । यतस्त्रिविधलोकस्य पुनस्सर्ग-समर्थं प्रधानमस्ति । अतो जानीमः प्रधानमस्तीति । [एवं] पञ्चहेतुभ्यः प्रधानं स्थापितम्[1] ॥ १५ ॥

पर आह । यदि प्रधानमस्ति । [तथापि] न व्यक्तं जनयितुं शक्नोति । निस्सहायत्वात् । यथा एकः पुरुषः पुत्रं जनयितुं न शक्नोति । एकस्तन्तुर्न पटं जनयितुं शक्नोति । तथा प्रधानमपि । अर्थयोत्तरमाह ।

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥

Ch: अव्यक्तं व्यक्तजननकारणम् , त्रयो गुणाः समुदिता व्यक्तं जनयन्ति ।
परिणामतः सलिलवत् प्रतिप्रतिगुणविशेषात् ॥

अव्यक्तं व्यक्तजननकारणमिति । प्रधानं त्रिगुणयुक्तत्वाद् व्यक्तं जनयितुं शक्नोतीत्यर्थः । प्रधानस्येमे गुणा न सन्ति [चेत्] । तदा भवदुक्तं सत्यं स्यात् ।

1. Here MV. GB. and CHE. all agree with one another substantially except in the matter of *dṛṣṭānta* used for *samanvaya.* According to STK. this verse is directed against Naiyāyikas and Vais'eṣikas who hold the view that *vyakta*, effect, earth, etc. comes from *vyakta*, atoms.

यदि सन्ति त्रयो गुणाः, [तदा] संयोगाभावाद् व्यक्तं[1] जनयितुं न शक्नोतीत्येतन्न युज्येत । त्रयो गुणास्समुदिता व्यक्तं जनयन्ति इति । यथा बहवस्तन्तवः सुमुदिताः पटं जनयन्ति । तथा त्रयो गुणा अपि परस्पराश्रितत्वाद् [1]व्यक्तं जनयन्ति । पर आह । लोके जननं द्विविधम् । (१) परिणामजं,यथा दुग्धादिजं दध्यादि । (२) अपरिणामजं, यथा मातापितृजः पुत्रः । प्रधानजं व्यक्तं कस्य कारणजस्य सम्बन्धि इष्यते । उत्तरमाह । परिणामतः दुग्धदधिवत् । प्रधानं व्यक्तं परिणमति । [2]यदेव व्यक्तं तदेव प्रधानम् । अतो न भिन्नजातीयजमिह स्वीक्रियते । पर आह । यद्येकं कारणं, न बहुविधं कार्यं जनयितुं शक्नुयात् । एष्वर्थेषु प्रधानमेकञ्चेत् कथं त्रिविधं लोकं जनयेत् । दिवि जाता[श्चे] त्तदा सुखिनः । मनुष्यजातास्तु दुःखिनः । तिर्यग्जातास्तु मूढा इति । यद्येकस्मात्कारणाज्जायते । कथं त्रिधा वर्गो लभ्यते । समाधीयते । सलिल[3]वत् [4]प्रतिप्रतिगुणविशेषात् ।

दिव्यमादावेकरसं जलं प्राप्नोति मेदिनीम् ।
नानारसं परिणमति पृथक् पृथग्भाजनविशेषात्[5] ॥

यदि सुवर्णभाजने वर्तते । तद्रसोऽतिमधुरः । यदि पृथिवीं प्राप्नोति । पृथिवीगन्धमनुसृत्य रसो नाना भवति, न समः । तथा त्रिविधो लोकोऽपि

1. Three eds. read फल for व्यक्त.
2. lit. इदं व्यक्तं, तदेव प्रधानम्.
3. This example is taken by MV. along with *pariṇāmataḥ.* Jaya, like CHC. takes it along with the following word. GB. takes the whole of second line as referring to the single idea that the evolution varies, like water, according to the particular basis of each *guṇā.* But MV. in explaining *pratiprati......viseṣāt*, resorts to the same example, water again. According to it *salilavat*, therefore, is to be construed both along with the preceding and following words.
4. So Three eds. Other eds. read सलिलवत् पृथक् पृथक् विशेषलाभात्.
5. In the Chinese this is in metrical form. In MV. andGB. it is in prose.

[न समः] । एकस्मात्प्रधानादुत्पन्नस्य [अपि] त्रिगुणवैषम्यात् । दिवि सत्त्वं विशालम् । अतो देवाः सदा सुखमनुभवन्ति । मनुष्येषु रजो विशालम् । अतो मनुष्याः बहु दुःखमनुभवन्ति । तिर्यग्गतेषु तमो विशालम् । अतस्तिर्यगादयः सदा मूढाः । आसु गतिषु सर्वत्र गुणाः सदा संयुक्ताः । औत्कट्यानौत्कट्याभ्यां तथा विशेषः । एवमेकं प्रधानं त्रीन् लोकाञ्जनयति । त्रि[1249, c. 2]गुणवैषम्यात्तु तारतम्यम् ॥ १६ ॥

प्रधानमवसितम् । अथेदानीं पुरुषं व्याख्यास्यामः । पुरुषः प्रधानवत्सूक्ष्मः । कथं जानीमः पुरुषोऽस्तीति प्रकाशयितुमिमामार्यामाह ।

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ॥ १७ ॥

Ch: सङ्घातपरार्थत्वात् त्रिगुणविपर्ययादधिष्ठानात् ।
भोक्तृभावात्कैवल्य[ार्थं प्रवृत्ते]श्च [इतीमे]पञ्च हेतवः साधयन्ति पुरुषोऽस्तीति ॥

(१) सङ्घातपरार्थत्वादिति । यथा व्यक्ताव्यक्तज्ञ[विज्ञाना]न् मोक्षो लभ्यते तथा प्रथमार्यायामुक्तम् । किञ्च प्रधानव्यक्तसाधनानि पञ्च हेतवः सम्यक् प्रतिपादिताः । अथ पुरुषोऽतिसूक्ष्मः साधयितव्यः । अस्ति पुरुषः सङ्घातपरार्थत्वात् । लोके हि वयं पश्यामः सर्वः सङ्घातः परार्थ इति । यथा शयनासनादयः[1] सङ्घाता न स्वार्थाः अवश्यं परार्थाः कल्पिताः । अस्त्यन्य उपभोजकः । तदर्था गृहादिसङ्घाताश्चैवम् । तथा महदाद्यपि । पञ्चभूतसङ्घातो देह आख्यायते । अयं देहो न स्वार्थः । [किन्तु] एकान्ततः परार्थोऽध्यवसीयते । पुरुष एव परः । अतो जानीमोऽस्तिपुरुष इति । (२) त्रिगुणविपर्ययादिति । प्रधानव्यक्तयोः षड्विधं सारूप्यमुक्तं पूर्वमार्यायाम् । [यथा]

1. यथा शयनासनादयः—Jaya. पर्यङ्करथशरणादयः—MV. पर्यङ्कवत्—GB. शयनासनाभ्यङ्गादिवत्—STK.

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्[1] ॥ इति ॥

एतत्षट्कविपर्ययादुच्यतेऽस्ति पुरुष इति । (३) अधिष्ठानादिति । यदि देहमिमं पुरुषोऽधितिष्ठति । तदा देहश्चेष्टते । यदि नास्ति देहस्याधिष्ठाता पुरुषः । तदा न चेष्टते । यथोक्तं षष्टितन्त्रे[2] । पुरुषाधिष्ठितं प्रधानं व्यक्तं जनयति । इति । तस्माज्जानीमोऽस्ति पुरुष इति । (४) भोक्तृभावादिति । यथा लोके षड्रसं पानं भोजनं च दृष्ट्वा ज्ञायते अस्त्यन्यो भोक्तेति । तथा महदादि दृष्ट्वा ज्ञायतेऽवश्यमन्येन भोक्त्रा भवितव्यं यस्य भोजन[मिद]म् । तस्माज्जानीमोऽस्ति पुरुष इति । (५) [3]कैवल्य[ार्थं प्रवृत्ते]श्चेति । यदि देहमात्रमस्ति । आर्यजनोपदिष्टो मोक्षोपायो निरर्थक एव स्यात् । यथा पुरा कश्चिदृषिर्ब्राह्मणानुपगम्यैवमुवाच ।

1. Verse 11 above.

2. This quotation is given both in MV. GB.

3. MV. reading *kaivalyārthapravṛtteh* interprets that there is *puruṣa* because *pradhāna* acts for *kaivalya*, isolation. Although GB. follows closely MV. in this verse, it however interprets the phrase differently:.. *yatah sarvo vidvān avidvāṃsca saṃsārasantānakṣyayamicchati.* Jaya agrees with MV. STK. explains it in a manner similar to that of CHC.: *Śāstrāṇām maharṣiṇām divyalocanānām*, etc.

We find a Śāstra of this type actually quoted in CHC.

Besides the arguments of the verse CHC. puts forth additional arguments to prove beyond doubt the existence of Ātman, which (arguments) we find neither in MV. nor in GB. and others.

सर्वे [यूयं] वेदधनाः सर्वे च सोमपायिनः ।
सर्वे दृष्टात्मजमुखा भिक्षुधर्ममथेच्छथ[1] ॥ इति ।

यदि देहमात्रमस्ति । किमर्थमिदं [वचनम्] । अतो जानीमो देहव्यतिरिक्त आत्मा स्वभावतोऽस्तीति । यदि नास्त्यन्य आत्मा, देहमात्रमस्ति । तदा मातापित्राचार्याणां पूज्यानां मरणानन्तरमुत्सृष्टा देहा यदि द[2]ह्यन्ते खन्यन्ते वा, एवं पर्युपास्यन्ते । तदा पापं लभ्येत । न पुण्यगुणः स्यात् । एतदर्थं जानीमोऽस्त्यन्य आत्मेति । किञ्चास्ति आप्तवचनम् ।

[1249, c. 3] मज्जास्थिनी रज्जुस्थूणौ भवतः, रक्तमांसे मृत्पांसू भवतः ।
अशुच्यनित्यं दुःखं [शरीरं] प्र[3]भुरात्मा एतत्सम्बन्धवर्जितः ॥
त्यज धर्ममधर्मं वापि त्याज्यं तुच्छसत्यकम् ।
त्यागभावोऽपि त्यक्तव्यः विशुद्धा केवलैशिता[4] ॥ इति ।

1. This citation is probably based on the verse cited in the Yaśastilaka Campū of Somadevasūrin VI, Sec. 5:

अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ।
तस्मात्पुत्रमुखं दृष्ट्वा पश्चाद्भवति भिक्षुकः ।

तथा

अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य युक्तितः ।
इष्ट्वा यज्ञैर्यथाकालं ततः प्रव्रजितो भवेत् ॥

This last verse seems to be from Manusmṛti VI 36. with slightly different readings.

2. Cp. N. Sūtra, शरीरदाहे पातकाभावात् III. 1, 4. with Bhāṣya, Vārtika and Ṭīkā.

3. Text. 'fu' 'lord', प्रभु. Three eds. read 'tang' 'ought to be.'

4. First verse, cp. Manu, VI 76:

अस्थिस्थूणं स्नायुयुतं मांसशोणितपेशलम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥

Second verse, cp. Ibid. 80-81.

यद्यात्मा नास्ति । कैवल्यं न वर्तेते । अस्मादाप्तागमात्पुरुषो नियतमस्तीति जानीमः । इमान् पञ्चहेतूनाश्रित्य पुरुषास्तित्वं साधितम् ॥ १७ ॥

पर आह । पुरुषः किं बहुशरीरेषु संहत्यैको लक्ष्यते [उत] प्रतिशरीरमेकः पुरुषः । यदुच्यते कथमेवं संशय इति । आचार्याणां मिथो [1]विरुद्धवादित्वात् । कश्चिदाह । एकः पुरुषः सर्वशरीराणि व्याप्नोति । मणिग्रथनसूत्रवत्[2] । मणयो बहवः सूत्रमेकम् । यथा च विष्णुरेकः स्त्रीषष्टिसहस्रैः सममेकस्मिन् समये रमते । तथा पुरुषोऽप्येकः सर्वशरीराणि व्याप्नोति । इति । अन्यः कश्चिदाचार्यः पुनराह । प्रतिशरीरं भिन्न आत्मास्तीति । तस्मान्मम संशयो जातः । समाधीयते । बहवः पुरुषाः । प्रतिशरीरं पृथक् पृथक् पुरुषोऽस्ति । कथमेवं ज्ञायते । आर्यया विवृणोति ।

जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ १८ ॥

Ch: ज[3]न्ममरणकरणानां प्रतिनियमादयुगपद्वृत्तिकरणाच्च ।
त्रैगुण्यविभेदात्पुरुषबहुत्वं सिद्धम् ॥

जन्ममरणकरणानां प्रतिनियमादिति । यदि पुरुष एकः । तदा एकस्मिन् जायमाने सर्वे जायेरन् । सर्वत्र सर्वाः स्त्रियो गर्भिण्यः स्युः प्रसववत्यः स्युः पुत्रवत्यः स्युः पुत्रीवत्यश्च स्युः । नैवं भवन्ति युगपदेकस्मिन् समये प्रति-प्रतिविलक्षणाः[सत्यः] । तस्माज्जानीमो बहवः पुरुषा इति । किञ्च [यदि] पुरुष एकः, एकस्मिन् म्रियमाणे सर्वेऽपि म्रियेरन् । एतदर्थासम्भवाज् ज्ञायते नैकः पुरुष

1. So Three eds. Other eds. read संकीर्णवादित्वात् (?).

2. मणिसूत्रवत्—MV. मणिरशनात्सकसूत्रवत्—GB. योगिशरीरवृन्दवत्—Jaya.

3. Chinese, sheng = जनन, जन्म or जाति.

इति । किञ्च करणानां प्रतिनियमात् । यद्येकः पुरुषः, एकस्मिन् बधिरे सर्वेऽपि बधिराः स्युः । सर्वेऽपि अन्धमूककाणादयश्च स्युरेकस्मिन् समये । तथात्वासम्भवाज् ज्ञायते बहवः पुरुषा इति । किञ्च त्रैगुण्यविभेदात् । यदि पुरुष एकः, त्रैगुण्यमविलक्षणं स्यात् । यथा एको ब्राह्मणस्त्रीन् पुत्रान् जनयति । एको मेधावी सुखी च । द्वितीयः कोपनो दुःखी च । तृतीयस्तामसो मूढश्च । यद्येकः पुरुष एकस्मिन् सात्त्विके सर्वे समं सात्विकाः [स्युः] । दुःखिनि मूढे चैवम् । [अतो यद्] उक्तं भवता पुरुष एको मणिग्रथन[सूत्र]वद् विष्णुवच्चेति । नैतद्युज्यते । तस्मात् हेतुपञ्चकेन जानीमो बहवः पुरुषा[1] इति ॥ १८ ॥

पर आह । ममात्र संशयः । [किं]मयं पुरुषः कर्ता वा अकर्ता वेति । यद्युच्यते कथमयं संशय इति । लोकव्यवहारात् । लोको हि वदति पुरुषो गच्छति पुरुष आगच्छति पुरुषः करोतीति । साङ्ख्या वदन्ति पुरुष अकर्तेति । वैशेषिका[1250] वदन्ति पुरुषः कर्तेति । तस्मान्मम संशयः । समाधीयते । पुरुषः अकर्तेति । कथं ज्ञायते । आर्यया विवृणोति ।

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥

Ch: व्यक्ताव्यक्तविपर्यासात् पुरुषस्य साक्षित्वं सिद्धम् ।
कैवल्यं माध्यस्थ्यं द्रष्टृ[त्व]मकर्तृ [भाव]श्च ॥

व्यक्ताव्यक्तविपर्यासादिति । पूर्वस्मिन्नार्याद्वय उक्तं पुरुषः प्रधानाद्भिन्नः व्यक्तादतिरिक्तश्चेति । तदुभयलक्षणविपर्यासात्, उभयवैषम्यात् । त्रयो गुणाः कर्तारः । तत्त्रिगुणविभिन्नत्वाद् अकर्तेति । पर आह । किं प्रयोजनमनेन इति । उच्यते । साक्षित्वस्य स्थापनात् । पुरुषस्य साक्षित्वं सिद्धम् । पुरुषस्य ज्ञातृत्वात् ।

1. MV. explaining *janmamaraṇa* of this K. gives an alternative explanation (*apare punaḥ*, etc.) which is found in CHC. GB. and others. But CHC. agrees in other respects with MV. Both of them leave unexplained *ayugapatpravṛtti*.

नावशिष्टानि तत्त्वानि तथा । कैवल्यमिति । प्रकृतिविकाराभ्यां भेदे सति पुरुष[1]स्य परिशुद्धत्वात् कैवल्यम् । माध्यस्थ्यमिति । त्रिगुणभिन्नत्वाद् गुणानां च संकोचविकासवैषम्यान् माध्यस्थ्यमिष्यते [पुरुषस्य] । यथैकः परिव्राज[2]कः केवल एकत्र स्थितो गतागतमन्यं नानुसरति [किन्तु] केवलं पश्यति । तथा त्रयो गुणाः संकोचविकासजननमरणसमर्थाः । केवलमेकः पुरुषः पश्यति तथाव्यापारान् । तस्मान्माध्यस्थ्यमिष्यते । प्रकृतिविकारभिन्नत्वात् पुरुषस्य सचेतनत्वाद् द्रष्टृत्वमुच्यते । तद्व्यापारत्वाद्द्रष्टेत्युच्यते न करोति । अतो गुणाः कुर्वन्ति इत्ययमर्थः सिद्धः । अस्ति पुरुषः । स चानेकोऽकर्ता इत्ययमर्थोऽपि सिद्धः ॥ १९ ॥

पर आह । यद्यकर्ता पुरुषः, कोऽध्यवसायं करोति धर्मं चरिष्यामीति । अनिष्टं परिहरिष्यामि प्रणिधानं वा साधयिष्यामीति कोऽध्यवसायं करोति । यदि त्रयो गुणाः कुर्वन्ति तमध्यवसायम् । एषां सचेतनत्वं भवेत् । [नेदमिष्टम्] गुणानामचेतनत्वस्य प्रागुपन्यासात् । यदि पुरुषोऽध्यवसायं करोति । तदा पुरुषः कर्ता सिद्धश्चेत् । [न चैतदिष्टम्] पुरुषस्याकर्तृत्वस्य प्रागुपन्यासात । तस्मादुभयथा दोषो भवति । आर्ययोत्तरमाह ।

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥ २० ॥

Ch: त्रयो गुणाः पुरुषसंयोगादचेतनाश्चेतनावन्त इव[भवन्ति] ।
त्रिगुणकर्तृत्वादुदासीनः कर्तेव [भवति] ॥

त्रयो गुणाः पुरुषसंयोगादिति । इमे गुणा अचेतनाः कुर्वन्ति । पुरुषः सचेतनो न करोति । अनयोर्द्वयोः संयोगाद्गुणाश्चेतनावन्त इव[भवन्ति] । यथा

1. So Three eds. Other eds. omit 'पुरुष'.

2. = taojen. So GB. MV. has *bhikṣu* and gives this ex. in explaining both *sākṣitva* and *kaivalya*. GB., like CHC. cites the ex. in connection with *mādhyasthya*. According to MV. *kaivalya* here means 'an impartial arbitrator'.

दग्धो घटोऽग्निना संयुक्त उष्णः, सलिलेन संयुक्तः शीतः । तथा त्रयो गुणाश्चेतनावता संयुक्ताश्चेतनावन्त इव कुर्वन्त्यध्यवसायम् । अत उक्तमचेतनाश्चेतनावन्त इवेति । [यद्] उक्तं भवता लोकव्यवहारात् पुरुषः कर्ता इति । तमर्थं समादध्मः । त्रिगुणकर्तृत्वादुदासीनः कर्तेव [भवती]ति । तत्संयोगादकर्ता कर्तेत्युच्यते । [1250, c. 2] यथा कश्चिद्ब्राह्मणो भ्रमाच्चोरसंघमध्यं प्रविष्टः । चोरे हन्तुं गृहीते सोऽपि सह हन्तुं गृहीतः । चोरेण सह गमनात् चोरनाम लभते । तथा पुरुषोऽपि कर्त्रानुबद्धः लोकव्यवहारेणोच्यते पुरुषः कर्तेति[1] ॥ २० ॥

पर आह । प्रकृतिपुरुषौ केन हेतुना संयुक्तौ । आर्यया उत्तरमाह ।

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

Ch: पुरुषस्त्रिगुणदर्शनार्थी, प्रधानञ्च कैवल्यार्थम् ।
पङ्ग्वन्धवत्संयुक्तौ, इत्यर्थवशाल्लोकसर्गः ॥

पुरुषस्त्रिगुणदर्शनार्थीति । पुरुष एवं मन्यते अहं त्रिगुणं प्रधानं द्रक्ष्यामीति । अतः पुरुषः प्रधानेन संयुज्यते । प्रधानं कैवल्यार्थमिति । [प्रधानमेवं मन्यते] अयं [2]तपस्वी पुरुषः केवलः ज्ञानदर्शनशक्तिमान् । तस्य कैवल्यं प्रापयिष्यामीति । तदर्थं प्रधानपुरुषौ संयुज्येते । [3]यथा राजा पुरुषेण संयुज्यते इमं पुरुषं नियोक्ष्य इति । स पुरुषोऽपि राज्ञा संयुज्यते । राजा मे वृत्तिं दास्यतीति । अतो राजपुरुषयोः संयोगोऽर्थवशात्सिद्धः । तथा प्रधानपुरुषयोः संयुक्तत्वमपि । पुरुषस्य दर्शनार्थं प्रधानस्य कैवल्यार्थं पङ्ग्वन्धवत्संयोगः ।

1. In this K. MV. GB. and CHC. agree in all respects including the illustration of thieves and that of jar.

2. *hun-k'u.* So three eds. Other eds read *yin-ku*

3. GB. omits this ex.

अत्र दृष्टान्तः । पुरा[1] किल वणिक्सार्थ उज्जयिनीं प्रस्थितः चोरैरभिहतः पृथक् विश्लिष्टो जगाम । [तदा] एको जात्यन्धः एको जातिपङ्गुश्च सर्वजनोत्सृष्टावास्ताम् । अन्धः समन्ताच्चङ्क्रममाणः आसीनेन पङ्गुना दृष्टः । पङ्गुरपृच्छत् । कस्त्वमिति । अन्धः प्रत्यवदत् । अहं जात्यन्धः न जानामि मार्गं येन समन्ताच्चङ्क्रमे । त्वं पुनः कः । पङ्गुः प्रत्यवदत् । अहं जातिपङ्गुः मार्गदर्शनमात्रक्षमः असमर्थो गन्तुमिति । [जात्यन्धोऽवदत्] तस्मान्मम स्कन्ध उपविश । अहं मार्गं नेतुं शक्नोमि । त्वं मम पन्थानं दर्शय । इति । एवं द्वौ पुरुषौ मिथःसंयोगेन [स्वा][2]धिष्ठानदेशमभ्यगच्छताम् । तयोः संयोगोऽर्थवशात् सिद्धः । गत्वा च तौ [स्वा]धिष्ठानदेशं पृथक् पृथग् व्ययुज्येताम् । तथा पुरुषः प्रधानदर्शनकाल एव मोक्षं लभते । प्रधानमपि पुरुषस्य कैवल्यं कृत्वा पृथङ्निवर्तते । अर्थवशाल्लोकसर्ग इति । पुरुषः अन्यदर्शनार्थं प्रधानं कैवल्यार्थं संयुज्येते । अयं संयोगः लोकं सृजति । यथा स्त्रीपुरुषोभयसंयोगात्पुत्रः संभवति । तथा प्रधानपुरुषसंयोगो महदादि सृजति ॥ २१ ॥

पर आह । संयोगो लोकं सृजतीत्युक्तम् । अयं सर्गः पुनः कीदृशः । आर्ययोत्तरमाह ।

प्रकृतेर्महान् ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि ॥ २२ ॥

Ch: प्रकृतेः क्रमेण जायते महान्, [ततः] अहङ्कारः [ततः] षोडशकः ।
षोडशके सन्ति पञ्च [तन्मात्राणि], तेभ्यः पञ्चभूतानि जायन्ते ॥

1. This anecdote is cited both in MV. and GB., but with some differences. The traveller's destination in MV. is Pāṭaliputra. CHC. agrees with GB. to some extent. Both of them narrate that the blind and lame go along with a company of travellers; while according to MV. only the blind was travelling, and being separated from his own companions and wandering here and there met with a lame man accidentally.

2. (?) = *So-tsai*

प्रकृतेः क्रमेण जायत इति । प्रकृतिरिति प्रधानं वा [1250, c 3] ब्रह्म वा बहुधात्मकं [1]वाख्यायते । यदि क्रमेण जायते । तदा प्रकृतेर्मूलत्वान् नास्ति [अन्यद्] यतो जायेत । प्रकृतेर्महान् प्रथममुत्पद्यते । महानिति[2] बुद्धिर्वा संवित्तिर्वा विभुर्वा मतिर्वा प्रज्ञा वाख्यायते । यत्र महान् तत्र मतिः । अतो महान् मतिरित्याख्यां लभते । ततो महतोऽहङ्कारो जायते । अहङ्कार[3] इति भूतादिर्वा वैकृतो वा तैजसो वाख्यायते । ततोऽहङ्कारात् षोडशक उत्पद्यते । षोडशक इति पञ्चतन्मात्राणि पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मन इन्द्रियञ्च । पञ्चतन्मात्राणि शब्दस्पर्शरूपरसगन्धाः, इमे [4]पञ्चतन्मात्रात्मकाः तन्मात्रशक्तयो वा । श्रोत्रत्वक्-चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि । वाक्पाणिपादोपस्थपायवः पञ्च कर्मेन्द्रियाणि । अयं षोडशकः अहङ्कारा[5]दुत्पद्यते । अत उक्तं महान् [ततः] अहङ्कारः [ततः] षोडशक इति । अथ षोडशके सन्ति पञ्च[तन्मात्राणि] तेभ्यः पञ्चभूतानि जायन्ते । [तत्र] शब्दतन्मात्रादाकाशमहाभूतमुत्पद्यते । स्पर्शतन्मात्राद्वायुमहाभूतमुत्पद्यते । रूपतन्मात्रात्तेजोमहाभूतमुत्पद्यते । रसतन्मात्राद् अम्महाभूतमुत्पद्यते । गन्धतन्मात्रात्पृथिवीमहाभूतमुत्पद्यते[6] । प्रकृतिविकृतिपुरुषान् त्रीन् धर्मान् दृष्ट्वा मोक्षो लभ्यते इत्यवोचम् ॥ २२ ॥

---

1. प्रकृतिः महान् ब्रह्म अव्यक्तं बहुधात्मकं मायेति पर्यायाः—MV. and GB. प्रकृतिः प्रधानं कारणम् अव्यक्तं गुणसाम्यं तमोबहुलम् अव्याकृतमिति प्रकृतिपर्यायाः–Jaya.

2. महान् बुद्धिः मतिः प्रज्ञा संवित्तिः ख्यातिः चितिः स्मृतिः आसुरी हरिः हरः हिरण्यगर्भ इति पर्यायाः—MV. महान् बुद्धिः आसुरी मतिः ख्यातिः ज्ञानं.. प्रज्ञा[इति] पर्यायाः - GB. महान् बुद्धिः मतिः प्रत्ययः उपलब्धि इति बुद्धिपर्यायाः—Jaya.

3. तस्येमे पर्यायाः वैकृतः तैजसः भूतादिः अभिमानः अस्मिता—MV. GB. gives the same omitting the last. अहङ्कारः सपर्णपणि(?) तत्पुरुषः-पर्यायाः—Jaya.

4. Read '*wu*' for '*hsiang*' (Takak.)

5. See note 2 on p. 6 above.

6. According to MV. these gross elements come from their respective fine elements adding to its own quality, other qualities of the previous fine elements each. Jaya and STK. follow the same.

पर आह । प्रकृतेर्महानुत्पद्यत इत्युक्तम् । महान् किंलक्षणकः । आर्ययोत्तरमाह ।

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ २३ ॥

Ch: अध्यवसायो महानुच्यते धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकं रूपम्, अस्माद्विपर्यस्तं तामसम् ॥

अध्यवसायो महानुच्यत इति । को नामाध्यवसायः । यदुतायं स्थाणुः अयं पुरुष इति । ईदृशी बुद्धिरध्यवसाय उच्यते । अध्यवसाय एव महानुच्यते । अयं महानष्टाङ्गः । चत्वारि अङ्गानि सात्त्विकानि । चत्वारि तामसानि । सात्त्विकानि अङ्गानि यदुत धर्मो ज्ञानं विराग ऐश्वर्यञ्चेति । धर्मः किंलक्षणः । यमनियमाः । [तत्र] [1]यमाः पञ्च । (१) अद्वेषः, (२) अचार्यसत्कारः, (३) अन्तर्बहिश्शौचम्, (४) अन्नपानानिग्रहः (५) अप्रमादः । नियमा अपि पञ्च । (१) अहिंसा, (२) अस्तेयम्, (३) सत्यवचनम्, (४) ब्रह्म-[1251]चर्यम्, (५) अशाठ्यम्[2] । [इमानि] दशविधानि साधनानि ।

---

1. According to MV. and GB. the 5 yamas are *ahimsā*, *satya*, *asteya*, *brahmacarya* and *aparigraha* and 5 niyamas: *s'auca*, *santoṣa*, *tapas*, '*svādhyāya* and *is'varapraṇidhāna*. MV. defines each of them. This is from Yogasūtra, so says GB. (*Pātañjale bhihitaḥ*). Among the 5 yamas of CHC. No. 1 may be corresponding to niyama, *santoṣa* of MV. and GB. No. 2 to *is'varapraṇidhāna*, No. 3 to *śauca*, and No. 4 to *tapas*. Among the 5 niyamas of CHC. the first four are the same as the first four yamas of MV. and GB. Dr. Takakusu remarks here that the adoration of God, the 5th niyama of GB. is very improbable for the atheistic system of Sankhyā, and that therefore the Chinese enumeration has greater chances of being original than that of GB.

2. or अश्लाघनम्

अतो धर्म उच्यते । किं नाम ज्ञानम् । ब्राह्यं ज्ञानमाभ्यन्तरं ज्ञानमिति ज्ञानं द्विविधम् । [1]बाह्यज्ञानं षड् वेदाङ्गानि । (१) शिक्षा, (२) व्याकरणम्, (३) कल्पः, (४) ज्योतिषम् (५) छन्दः (६) निरुक्तम्[2] । एतानि षड् विद्यास्थानानि [3]बाह्यमुच्यते । आभ्यन्तरज्ञानं त्रिगुणपुरुषान्तरोपलब्धिः । बाह्य-ज्ञानेन लौकिकं लभ्यते । आभ्यन्तरज्ञानेन मोक्षो लभ्यते । किं वैराग्यम् । बाह्यमाभ्यन्तरञ्चेति वैराग्यं द्विविधम् । बाह्यमिति । धनानामर्जनरक्षणक्षयकाले क्लेशान् दृष्ट्वा रक्षणासक्तिहिंसे द्विविधदोषौ च दृष्ट्वा तद्दर्शननिमित्तं विरक्तो गृहात्प्रव्रजति । एवं विरक्तो न लभते मोक्षम् । तद्वैराग्यं बाह्यज्ञानेन लभ्यते । आभ्यन्तरवैराग्यमिति । विज्ञातपुरुषगुणभेदत्वात्प्रव्रजितुमिच्छति । आभ्यन्तरज्ञान-पूर्वकं [यद्] वैराग्यं लभ्यते । तद्वैराग्यान् मोक्षं लभते । बाह्यवैराग्येण पुनः संसारे वर्तते । आभ्यन्तरवैराग्येण मोक्षं लभते । ऐश्वर्यमिति । ऐश्वर्यमष्टविधम् । (१) [4]अणिमा अत्यन्तशून्यवदवस्थितिः । (२) लघिमा अत्यन्तं मनोवत्सिद्धिः । (३) [महिमा] अकाशवद् अत्यन्तविभुत्वम् । (४) प्राप्तिः यथेष्टलाभः । (५) [ईशत्वं] त्रयाणां लोकानां मौलेश्वरत्वम् । (६) [प्राकाम्यं]

1. बाह्यं वीणापणवगन्धर्वचित्रकथागणितव्याकरणशास्त्राणि— MV.
2. GB. adds. पुराणानि न्यायमीमांसाधर्मशास्त्राणि च ।
3. Three eds. read बाह्यज्ञान.
4. MV. enumerates the supernatural powers thus, *aṇiman, laghiman, gariman, mahiman, prāpti prākāmya, iśitva: vaśitva* and *yatrakāmāvasāyitva* which make the total 9, and defines none of them. GB, enumerates the same omitting *gariman* and defines them all. Jaya also omits *gariman* and gives the last as *yatrakāmāvaśāyitva, avaśāyitva* meaning *avasthāyitva.*, *STK. includes* both *gariman* and *kāmāvasāyitva.* in the list.

The statement of STK. yacca kāmāvasāyitvam, *sā satyasaṅkalpatā,* leads one to suspect whether he meant to bring it under any of the last 3 powers. We may amend the text *yacca kāmāvasāyitva* as *yacca yatra kāmā.* Vyāsa in his Yogabhāṣya III. 45, gives 8 powers omitting *gariman.*

यथेच्छं युगपद्विषयोपभोगक्षमत्वम् । (७) [वशित्वं] अपारतन्त्र्यबन्धः, त्रिलोकसत्त्वानामात्मानुसारेणाज्ञाकरणे प्रेरणम् । (८) यथाकामावस्थायित्वं, यदुत यथाकालं यथादेशं यथाचित्तं च वृत्तिलाभः । एते चत्वारो धर्माः सात्त्विक-लक्षणाः । सत्वमुत्कटं चेद् रजस्तमसी अभिभवति । अस्मिन् समये पुरुषः सत्त्व-बहुलत्वाद् धर्मादीन् चतुरो गुणान् लभते । इदं सात्त्विकरूपम् । अस्माद्विपर्यस्तं तामसमिति । धर्मादिचतूरूपविपर्यस्ताः (१) अधर्मः (२) अज्ञानं (३) संरागित्वम् (४) अनैश्वर्यम् । इमे चत्वारो धर्मास्तामसलक्षणाः । एवं चत्वारि सात्त्विकानि चत्वारि तामसानि अङ्गानि यदि महता संयुज्यन्ते । तदा महानष्टाङ्गः । विकारकालेऽयं पूर्वजश्च ॥ २३ ॥

[इति] सुवर्णसप्ततिशा[स्त्रे] पूर्वखण्डः ॥[1]

1. Here we find in the body of the text a long note added by the editors of the Kao-li-edition upon which the present edition of Suvarṇasaptati Śāstra (Chinese translation) is based. See foot-note 1 on p. 1345 Chin. Trip. Vol. 54. Dr. H. Ui writes in his letter to me to the effect that the first part of the note is an extract from the *Kai-yuan-lu.* It may be translated thus: According to *Kai-yuan-lu* (Nanjo's No. 1485) another name [of the Suvarṇasaptati Śāstra] is Śānkhya Sāstra. It is called [either 3 fasciculi] or 2 fasciculi.

The above-named Śāstra was composed by the Sage Kapila, a Tīrthika. It explains 25 principles (tattvas), and [therefore] it is called Number-science. It is the same Kapila Śāstra mentioned [occasionally] in the Sūtras [of the Buddhists].

Again the two catelogues *Chaṅ-faṅ* and *Nei-tien-lu* mention (lit. have) Suvarṇasaptati, 3 fasc. among the translations by Paramārtha and the Sānkhya Śāstra 3 fasc. too. The mentioning (or enumerating) of the two catalogues is incorrect. Dr. H. Ui was kind enough to tell me that the two catalogues mentioned in the note above as *Chaṅ-fuṅ* and *Nei-tieṅ-lu* are the Li-tâi-sân-pao-ei, compiled by *Fie-chaṅ-faṅ* and the *Ta-thaṅ nei-tien-lu* complied by Tao-suen respectively (Nanjio's Nos. 1504 and 1483).

[1251, c. 2] [अथ] सुवर्णसप्ततिशा[स्त्रे] [1]मध्यमखण्डः ।

पर आह । महानुक्तः अहङ्कारलक्षणं किम् । आर्ययोत्तरमाह ।

अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्तते सर्गः ।
ऐन्द्रिय एकादशकस्तन्मात्रपञ्चकश्चैव[2] ॥ २४ ॥

The second half of the note which is added by the editors of Kao-li-edition themselvss may be translated.

"This Śāstra and Vaiśeṣika Daśapadārtha Śāstra are not Buddha's teachings.

Among the schools of Tirthikas the Sāṅkhya and Vaiśeṣika are superior. With a view to make one who (wishes to) learn widely and refute fully (every) incorrect view and reveal the truth (of Buddhism) know minutely the doctrine of schools other than (Buddhism) translations (of these two works) were issued. In order to prevent to be lost and not to preach, (these two works) were admitted into the Canon". It is to be noted that the Vaiśeṣika Daśapadārtha mentioned above is the same work translated by Dr. H. Ui under the title 'Vaiśeṣika philosophy'. The term Sāṅkhya in the first half of the above note is transliterated as *seng-chia.* Ui says this is incorrect'. It is usually *Sangha*. The correct transliteration is *seng-chieh*, so in the *Kai-yuan-lu.*

1. Three eds add : तीर्थिककपिलकृते·

2. So MV. GB. reads in the second line : एकादशकश्च गणः तन्मात्रः पञ्चकश्चैव. STK. and Jaya read similarly with the modification तन्मात्र(त्रा)पञ्चक. Bhaṭṭotpala reads like MV. with the modification ऐन्द्रियमेकादशकम् (*See.* Sāṅkhyakārikā ed. by S. S. S. Sastri, 1935. Appendix). Paramārtha seems to read the last word 'तन्मात्रभूतपञ्चकः'. But this reading is certainly incorrect according to STK. which explains that *eva* in the verse is intended to exclude an evolution from *ahaṅkāra* of other than the two varieties of *aindriya* and five *tanmātras.*

Ch: अहङ्कारोऽभिमानः तस्माद्द्विविधः सर्गः [प्रवर्तते] ।
(१) एकादशक ऐन्द्रियः (२) तन्मात्रपञ्चको महाभूतपञ्चकश्च ॥

अहङ्कारोऽभिमान इति । अहङ्कारस्य किं लक्षणम् । यन् मम शब्दः, मम स्पर्शः, मम रूपं मम रसः मम गन्धः मम पुण्यगुणः प्रिय इत्येवमभिमानोऽहङ्कार आख्यायते । तस्माद्द्विविधः सर्गः [प्रवर्तते] इति । तस्मादहङ्काराद्द्विविधो विकारः प्रवर्तते । को द्विविधः । (१) एकादशक ऐन्द्रियः (२) तन्मात्रपञ्चको महाभूतपञ्चकश्च । एकादशेन्द्रियाणां पञ्चतन्मात्राणां नामानि प्रागुक्तानि ॥ २४ ॥

अहङ्कारलक्षणमुक्तम् । [1]अहङ्कारस्त्रिविधः । को धर्मः [2]प्रत्येकमुत्पद्यते । आर्ययोत्तरमाह ।

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ २५ ॥

Ch: एकादशकः सात्त्विको वैकृतादहङ्कारात्प्रवर्तते ।
भूतादेस्तामसस्तन्मात्रः प्रवर्तते तैजसादुभयं प्रवर्तते ॥

एकादशकः सात्त्विको वैकृतादहङ्कारात्प्रवर्तत इति । बुद्धौ सत्त्वमुत्कटश्चेत्, तदा अहङ्कारं जनयति । रजस्तमसी अभिभवति । सोऽहङ्कारः [3]सात्त्विकः । आर्या वैकृतं नाम [तं] वदन्ति । अयं वैकृतोऽहङ्कार एकादशेन्द्रियाण्युत्पादयति । कथं ज्ञायते । तानि सत्त्वबहुलानि लघुप्रकाशविशुद्धानि स्वविषयग्रहणसमर्थानि । अतस्तान्येकादश सात्त्विकानि इत्युच्यन्ते । भूतादेस्तामसस्तन्मात्रः प्रवर्तत इति ।

---

1. Three eds. add द्विविध

2. lit. एकमनुसृत्य·

3. According to MV. and GB. *ahaṅkāra* becomes *sāttvika* when the guṇa, *sattva* is prominent in it and other guṇas, *rajas* and *tamas* are subordinate; *tāmasa* when *tamas* is prominent and other 2 guṇas subordinate; and *rājasa* when *rajas* is prominent and other 2 guṇas subordinate.

महति तम उत्कटश्चेत्, तदा अहङ्कारमुत्पादयति । सत्त्वरजसी अभिभवति । अयमहङ्कारस्ता[1]मसः । अत अर्या भूतादिं नाम[तं] वदन्ति । अयमहङ्कारः पञ्चतन्मात्राण्युत्पादयति । अतः पञ्चतन्मात्राणि पञ्चमहाभूतानि च सर्वाणि तामसजातीयानि । तैजसादुभयं प्रवर्तते । इति । महति रज उत्कटश्चेत्, तदा अहङ्कारं जनयति । सत्त्वतमसी अभिभवति । सोऽहङ्कारो [1251, c. 3] रा[1]जसः । अत आर्याः [तस्य] तैजसमिति नाम व्यवस्थापयन्ति । अयमहङ्कार उभयमुत्पादयति । एकादशेन्द्रियाणि पञ्चतन्मात्रादीनि चोत्पादयति । सात्त्विक-वैकृतिकोऽहङ्कार इन्द्रियाणामुत्पादकस्तैजसमहङ्कारं सहायं गृह्णाति । कथमेवम् । तैजसः सक्रियत्वेन विकृतः । सात्त्विकः निष्क्रियत्वेन विकृतः । [अतः] अहङ्कारो यदा एकादशेन्द्रियाण्युत्पादयति । अवश्यं तैजसमहङ्कारं सहायं गृह्णाति । भूताद्यहङ्कारो यदा पञ्चतन्मात्राणि [2]पञ्चमहाभूतानि चोत्पादयति । अवश्यं तैजसमहङ्कारं सहायं गृह्णाति । कथमेवम् । तामसाहङ्कारस्य निष्क्रियत्वात् तैजसस्य सक्रियत्वात् । एवं तैजसोऽहङ्कार एकादशेन्द्रियाण्युत्पादयति पञ्चतन्मात्राणि चोत्पादयति । अत उक्तं तैजसादुभयं प्रवर्तत[3] इति ॥ २५ ॥

पर आह । सात्त्विक एकादशेन्द्रियाण्युत्पादयतीत्युक्तम् । कान्येकादशेन्द्रियाणि । आर्ययोत्तरमाह ।

बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षूरसननासिकाख्यानि ।[4]
वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥ २६ ॥

---

1. Lit. तम अनुसृत्य.
2. That *ahaṅkāra* gives rise to the 5 gross elements is quite contrary to the classical Sānkhya and even to CHC's own statement made on the verses 3 and 15.
3. The same process of evolution is referred to in the Suśruta, Sutras. 1, 4.
4. So MV. STK. and Jaya read : चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि । GB.: चक्षु... रसनस्पर्शनानि.

Ch: श्रोत्रं त्वक् चक्षूरसनं नासिका, इमानि पञ्च बुद्धीन्द्रियाख्यानि ।
वाक् पाणिः पादः पायुरुपस्थः [इमानि] पञ्च कर्मेन्द्रिय[ख्यानि] ॥

श्रोत्रं त्वक् चक्षूरसनं नासिका, इमानि पञ्च बुद्धीन्द्रियाख्यानि इति । कथमुच्यते [बुद्धी] न्द्रियमिति । तानि पञ्च शब्दरूपादिग्रहणसमर्थत्वाद् बुद्धीन्द्रियाणि नाम उच्यन्ते । वाक् पाणिः पादः पायुरुपस्थः [इमानि] पञ्च कर्मेन्द्रिया-[ख्यानि] इति । कथमुच्यते कर्मेन्द्रियमिति । भाषणादिवृत्तीरिमानि पञ्च कुर्वन्ति । तस्मात्पूर्वाचार्यैः पञ्च कर्मेन्द्रियाणीति नाम व्यवस्थापितम् । पर आह । एषां दशेन्द्रियाणां कीदृश्यः स्ववृत्तयो भवन्ति । श्रोत्रेन्द्रियं शब्दतन्मात्रादुत्प[1]न्नमकाशमहाभूतसजातीयम् । अतः केवलं[2] शब्दं गृह्णाति । त्वगिन्द्रियं स्पर्शतन्मात्रादुत्पन्नं वायुमहाभूतसजातीयम् । अतः केवलं स्पर्शं गृह्णाति । चक्षुरिन्द्रियं रूपतन्मात्रादुत्पन्नं तेजोमहाभूतसजातीयम् । अतः केवलं रूपं गृह्णाति । रसनेन्द्रियं रसतन्मादुत्पन्नमम्महाभूतसजातीयम् । अतः केवलं रसं गृह्णाति । नासिकेन्द्रियं गन्धतन्मात्रादुत्पन्नं पृथिवीमहाभूतसजातीयम् । अतः केवलं गन्धं गृह्णाति । [एवं] पञ्चकर्मेन्द्रियाणां पञ्च वृत्तयः सन्ति । वागिन्द्रियं बुद्धीन्द्रियसंयुक्तं नामपदव्य[3]ञ्जनानि वक्तुं शक्नोति । पाणीन्द्रियं बुद्धीन्द्रियसंयुक्त-मादानधारणादिकर्माणि सुष्ठु कर्तुं शक्नोति । पादेन्द्रियं बुद्धीन्द्रियसंयुक्तं समनिम्नोन्नतमार्गे क्रमितुं शक्नोति । उपस्थेन्द्रियं बुद्धीन्द्रियसंयुक्तमानन्दयति पुत्रञ्च जनयति । पाय्विन्द्रियं बुद्धीन्द्रियसंयुक्तं पुरीषं मलञ्चोत्सृजति । एतदर्थं दशेन्द्रियाण्युच्यन्ते ॥ २६ ॥

पर आह । कीदृशं मन इन्द्रियम् । आर्ययोत्तरमाह ।

---

1. See page 6. Foot-note No. 2
2. Three eds. omit केवल.
3. Read ' wen ' for wei (Takak.)

उभयात्मकमत्र मनः संकल्पकमिन्द्रियश्च साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं ग्राह्यभेदा[1]च ॥ २७ ॥

Ch: संकल्पकं मन इन्द्रियमुभयविधमुच्यते ।
गुणपरिणामविशेषाद्ग्राह्यभेदाच्च नानात्वम् ॥

[1252] संकल्पकं मन इन्द्रियमुभयविधमुच्यत इति । मन इन्द्रियमुभयविधं संकल्पात्मकम् । कथमेवम् । इदं मन इन्द्रियं यदा बुद्धीन्द्रियेण संयुक्तं, तदा बुद्धीन्द्रियमित्याख्यायते यदा कर्मेन्द्रियेण संयुक्तं तदा कर्मेन्द्रियमित्याख्यायते । कस्मात् । यस्माद् इदं मन इन्द्रियं बुद्धीन्द्रियवृत्तिं संकल्पयति । कर्मेन्द्रियवृत्तिं च संकल्पयति । यथा[2] एकः पुरुषः कदाचित्कर्मकर उच्यते । कदाचित्प्रवक्ता । एवं मन इन्द्रियमपि । इदं मनः कथमिन्द्रियमुच्यते । [तद्धि] दशेन्द्रियसधर्म । दशेन्द्रियाणि वैकृतादहङ्कारादुत्पद्यन्ते । एवं मन इन्द्रियमपि । दशेन्द्रियसमवृत्ति च । यद् दशेन्द्रियाणि कुर्वन्ति, [तत्] मन इन्द्रियमपि समं करोति । तस्मादिन्द्रियमिति नाम लभते । पर आह । इन्द्रियाणां वृत्तयः प्रत्येकं विलक्षणाः, मनइन्द्रियस्य प्रतिनियता वा न वा । उच्यते । यः संकल्पः सैव तस्य [3]वृत्तिः । तद्यथा[4], कश्चित्पुरुषः कुत्रचित्प्रदेशे धनमन्नं वास्तीति शृण्वन् मनसि वदति अहं तत्र गत्वा अन्नं ततो लाभञ्च लप्स्ये इति । एतादृशसंकल्पो मन इन्द्रियस्य प्रतिनियता वृत्तिः । उत्पत्तिसाम्याद्वृत्तिसाम्यात् संकल्पवृत्तिप्रतिनियमाच्च तदिन्द्रियमित्याख्यायते ।

1. So MV. CHC. has बाह्यभेदाच्च. GB. STK. Jaya and Candrikā : बाह्यभेदाश्च. Bhaṭṭotpala reads the first line : संकल्पकमत्र मनः तच्चेन्द्रियमुभयथा समाख्यातम् (See. S. S. S. Sastri : Sāṅkhya karikā, Appendix). This reading agrees almost with Paramārtha's.

2. यथा देवदत्तो गोपालमध्ये स्थितो गोपालत्वं कुरुते । मल्लमध्ये स्थितो मल्लत्वं कुरुते MV. GB. has no ex. here.

3. lit. संकल्प एव तस्य वृत्तिः । Three eds. संकल्पस्तु etc.

4. There is no illustration in MV. and GB. This illustration in an improved form is found in Kamalaśilā's Tatt. pañ. p. 16 and also in Guṇaratna's commentary, p. 101. (B. I. ed.)

तस्मादिन्द्रियाण्येकादशविधान्येव । पर आह । इन्द्रियाणामेकादशानामेषां कः कर्ता । यदुच्यते कथमयं संशय इति । आचार्याणां प्रतिपत्तिवैषम्यात् । केचिदाहुः । पुरुषकृतानीति । केचिदाहुः । ईश्वरकृतानीति । केचिदाहुः । [स्व] भावकृतानीति । एवमादिप्रतिपत्तयः प्रत्येकं विषमाः । अतो मम शङ्का जाता । एषु इन्द्रियविषयेषु एकादशविधानि [इन्द्रियाणि] नियमेन सचेतनात्प्रवर्तन्ते । कथमेवं ज्ञायते । इमान्येकादशेन्द्रियाणि एकादशविषयग्रहणसमर्थानि । प्रधानमहदहङ्काराणामचेतनत्वात्तत्सामर्थ्यं न युज्यते ॥ लोकायतशास्त्र[1] उक्तम् ।

[येन][2] शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता [येन] स नो वृत्तिं विधास्यति ॥ इति ।

इदं लोकायतिकवचनम् । अतो ममेदानीं संशयः कस्मादेकादश [इन्द्रियाणि] प्रवर्तन्ते । उच्यते । अस्मिन् शास्त्रे न पुरुषः कर्ता । नापीश्वरः कर्ता । [स्व] भावो नामातिरिक्तो धर्मो नास्ति । तस्माद्भवतोक्तः [पुरुषादिः] नैकादशेन्द्रियाणि जनयति । पर आह । तथा चेत् को धर्मो जनकः । उत्तरमाह । गुणपरिणामविशेषाद्ग्राह्यभेदाच्च नानात्वम् । त्रयो गुणा अहङ्कारस्थाः पुरुषार्थवशादेकादशेन्द्रियाणि परिणमन्ति । कः पुरुषार्थः । इमे एकादश बाह्यविषया बहवः विषमाश्च । यद्येकमिन्द्रियं प्रवर्तेत । न सर्व[विषय] ग्रहणसमर्थं स्यात् । तस्मात्प्रवर्तन्ते एकादशेन्द्रियाणि प्रतिनियतं च विषयान् गृह्णन्ति । अत एकादशेन्द्रियाणि विभक्तानि नाना च । अथ भवान् वदति अचेतनो न बहून् जनयितुं शक्त इति । नैतद्युज्यते । अचेतनस्य [1252, c. 2] बहुशक्तिदर्शनात् । वक्ष्यति ह्यस्मिन् शास्त्रे ।

1. Three eds : लोकायतशास्त्रे लोकायतिकपण्डित आह.

2. According to Chinese : [यः] हंसं शुक्लं जनयति, शुकं हरितं जनयति, मयूरं चित्रं जनयति, आत्मापि तस्माज्जायते । This verse is again quoted *ad*. ver. 61 where we have करोति for जनयति and in the last quarter अयं हेतुरस्मज्जन्म (or प्रवृत्तिं) करोति.

वत्स[1]विवृद्धिनिमीत्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ इति ।

Ch: वत्सविवृद्धिनिमित्तं अज्ञगौः क्षीरं प्रवर्तते ।
पुरुषविमोक्षनिमित्तं अज्ञं तथा इन्द्रियं प्रवर्तते[2] ॥

अतस्त्रयो गुणा अचेतना एकादशेन्द्रियाणि जनयितुं शक्ताः । पर आह । जानीम एकदशेन्द्रियाणि अहङ्कारादुत्पन्नानीति । एषामेकादशेन्द्रियाणां विभिन्नः स्थाननिक्षेपः केन कृतः । चक्षुरुच्चैः स्थितं विप्रकृष्टरूपालोकनक्षमम् । श्रोत्रं प्रत्येकमेकस्मिन् पार्श्वे [स्थितं] दूरशब्दश्रवणक्षमम् । घ्राणमेकत्र निविष्टं प्राप्यगन्धं गृह्णाति । रसनं मुखमध्यनिविष्टमागतं रसं गृह्णाति । त्वगिन्द्रियमन्तर्बहिर्निविष्ट सर्वं स्पर्शाज्जानाति । वाक् मुखमध्यनिविष्टा नामपदव्यञ्जनान्युच्चारयति । पाणी वामदक्षिणयोस्स्थितावादानधारणसमर्थौ । पादौ नीचावयवसंनिविष्टावूर्ध्वमधः क्रामतः । मिथुनेन्द्रियमन्यदर्शनपरिहारार्थं गुह्यप्रदेशे निविष्टमुत्सर्गानन्दजननसमर्थम् । मन इन्द्रियमनियतप्रदेशं संकल्पवृत्तिं करोति[3] । तेषामिन्द्रियाणां स्थाननिक्षेपः केन कृतः । किं पुरुषकृतः । ईश्वरकृतः[4] । किं वा[स्व] भावेनातिरिक्तकारणेन कृतः । समाधीयते । अस्मिन् शास्त्रे पुरुषोऽपि न कारणमुच्यते । ईश्वरोऽपि न कारणम् । प्रधानं मुख्यं कारणम् । प्रधानं त्रिगुणानहङ्कारञ्च सृजति । अहङ्कारश्च पुरुषार्थमनुसृत्य प्रवर्तते । एभिःत्रिभिर्गुणैः इन्द्रियाणि स्थाने निक्षिप्तानि । अत उक्तं गुणपरिणामविशेषाद्बाह्यभेदाच्च नानात्वमिति । संनिकृष्टविप्रकृष्टवृत्तीनामिन्द्रियाणां द्वावर्थौ, (१) [5]हेयपरिहारः[6] (२) शरीरसंरक्षणम् इति । हेयपरिहार इति । विप्रकृष्टदर्शनं विप्रकृष्टश्रवणं हेयपरिहाराय । शरीरसंरक्षणमिति । [अष्टेन्द्रियाणि] अष्टविषयानिन्द्रिदेशं प्राप्ता-

1. v. ver. 57 below.
2. This line in three eds. reads : अज्ञमिन्द्रियं प्रवृत्य प्रकाशते.
3. Three eds. 'hsing' अभिसंस्करोति.
4. Ibid. कृत is omitted.
5. Ibid : दुःखपरिहार·
6. lit.—रार्थः,—णार्थः

नुपलभन्ते स्वशरीरसंवर्धनपालनाय[1] ॥ २७ ॥

पर आह । एतान्येकादशेन्द्रियाणि कां वृत्तिं कुर्वन्ति । आर्ययोत्तरमाह ।

रू[2]पादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गानन्दास्तु पञ्चानाम् ॥ २८ ॥

Ch: रूपादिविषयालोचनमात्रं पञ्चबुद्धीन्द्रियाणां वृत्तिः ।
वचनादानविहरणानन्दोत्सर्गाः पञ्चकर्मेन्द्रियाणां वृत्तिः ॥

रूपादिविषयालोचनमात्रं पञ्चबुद्धीन्द्रियाणां वृत्तिरिति । चक्षूरूपं केवलमालोचयति । इयमेव चक्षुषो वृत्तिः । केवलमालोचयति न तु संकल्पयति धारयति आददाति वा । तथावशिष्टानामपीन्द्रियाणाम् । पृथक् पृथक् स्वविषये प्रकाशमात्रं तेषां वृत्तिः । बुद्धीन्द्रियं विषयप्रकाशनसमर्थम् । कर्मेन्द्रियमुपभोग्यादानक्षमम् । बुद्धीन्द्रियवृत्तिरुक्ता । अथोच्यते कर्मेन्द्रियवृत्तिः । [वचनेत्यादि] । वचनं भाषणं वागिन्द्रियगोचरः । आदानं पाणिगोचरः । विहरणं क्रमणं पादगोचरः । आनन्दः पुत्रोत्पत्तिश्च उपस्थगोचरः । उत्सर्गः विसर्गः पायुगोचरः । इति कर्मेन्द्रियवृत्तय उक्ताः ॥ २८ ॥

अथ वक्ष्यन्ते महदहङ्कारमनसां वृत्तयः ।

स्वालक्षण्या[3] वृत्तिः त्रयस्य सैषा भवत्यसामान्या ।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ २९ ॥

Ch: त्रयस्य स्वलक्षणं वृत्तिः, त्रयोदशानामसामान्या ।
[1252, c. 3] इन्द्रियाणां सामान्यवृत्तिः प्राणाद्याः पञ्च वायवः ॥

1. These 2 objects of *indriyas* are not mentioned in MV. and GB.
2. STK. and Jaya : शब्दादिषु.
3. So. MV. and GB. STK. Jaya and Candrikā : स्वालक्षण्यं, etc.

महतो वृत्तिरध्यवसायः[1] । अभि[2]मानमहङ्कारस्य लक्षणम् । तल्लक्षणमेवाहङ्कारस्य वृत्तिः । संकल्पो मनसो लक्षणम् । तल्लक्षणमेव मनसो वृत्तिः । त्रयोदशानामसामान्येति । दशेन्द्रियाणां पृथक् पृथक् गोचराणि महदहङ्कारमनसां पृथक् पृथक् लक्षणानि कृतानि । अत [त्रयोदशाना] मसामान्या वृत्तिरुक्ता । इन्द्रियाणां सामान्यवृत्तिः प्राणाद्याः पञ्च वायव इति । यदुच्यतेऽसामान्यवृत्तित्वम् । [3]सुतरां ज्ञायते सामान्यवृत्त्या भवितव्यमिति । असामान्यवृत्ति यथा नृणां प्रत्येकमेका[4]स्त्री । सामान्यवृत्ति यथा बहुपुरुषाणामेका साधारणी दासी । [इन्द्रियाणां] का साधारणी वृत्तिः । यत् पञ्चविधा वायवः । (१) प्राण (२) अपान (३) उदान (४) व्यान (५) समानाः[5] । एते पञ्च वायवः सर्वेन्द्रियाणां सामान्यवृत्तिः । प्राणवायुरिति । मुखनासिकमस्य मार्गः । बाह्यविषयग्रहणमस्य वृत्तिः यदुत अहं तिष्ठामि अहं गच्छामि इति । अयमेव तद्व्यापारः । पर आह । अयं प्राणः कतमस्येन्द्रियस्य व्यापारः[6] । उच्यते । त्रयोदशेन्द्रियाणामयं साधारणो व्यापारः । यथा[7] पञ्जरे

1. lit. मननम्.

2. lit. अहंभाव.

3. Three eds. अवश्यम्.

4. कुलस्त्रीस्थानीया—MV. GB. has no example here.

5. MV. gives the last 2 vital airs in the reverse order; *samāna vyāna*. GB. and STK. give the last three in different order; *samāna udāna vyāna*. Jaya's order: *vyāna udāna samāna*

6. lit. —यं व्यापारयति.

7. MV. illustrates thus: 'Suppose in a royal house the parrots in a cage knowing the food supplied to them by some body move towards it, then the cage also moves. The motion of the cage is due to all parrots moving. Similarly the motion of *prāṇa* air is common to all organs'. We may gather from this that he compares the *prāṇa* air with the cage and organs with parrots. But GB. like CHC. explains that the *prāṇa* air causes the motion of all organs like a parrot in a cage.

शुकः । शुकचलनात् पञ्जरं चलति । तथा इन्द्रियाण्यपि । प्राणवायुचलनात् त्रयोदशेन्द्रियाणि सर्वाणि चलन्ति । तस्मात्त्रयोदशेन्द्रियाणां साधारणो व्यापारः । अपानवायुरिति । भयकर्म दृष्ट्वा सन्त्रस्ततोऽपसरति । अयं वायु र्बहुलश्चेत्, तदा पुरुषोऽवलीनो भवति । उदानवायुरिति । [अनेन] पुरुषः पर्वतमारुरुक्षति । [मन्यते च] अहमुत्कृष्टो नान्य एवमिति । अहमेतत्करणसमर्थ इति । अयं वायु र्बहुलश्चेत्, तदा पुरुष उद्धतो भवति । यदहमुत्कृष्ट अहमाढ्य इत्यादि । इयमुदानस्य वृत्तिः । व्यानवायुश्शरीरं व्याप्नोति । अन्ते च शरीरं मुञ्चति । अयं वायुर्यदि बुहुलः, तदा पुरुषो नान्यं हित्वा[1] रमते । अयं वायुर्यदि किञ्चित् किञ्चत् मुञ्चति । [तदा] अङ्गानि मृतवद्भवन्ति । अत्यन्तमोचनञ्चेत् ततो मरणम् । समानवायुर्हृद्देशे तिष्ठति । [आहार] समानयनसमर्थः । सैव तस्य वृत्तिः । अयं वायुर्यदि वहुलः । पुरुषो लुब्धो भवति । धनं मृगयते । सहचरीश्च मृयते । इमाः पञ्चप्राणवृत्तयस्त्रयोदशेन्द्रियकृताः ॥ २९ ॥

त्रयोदशेन्द्रियाणामेषामसामान्या[2] [सामान्या] च वृत्तिरुक्ता । इदानीं युगपद्वृत्तिः क्रमशो वृत्तिश्च वक्ष्यते । आर्यया तामाह ।

युगपच्चतुष्टयस्य हि वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥

Ch: बुद्ध्यहङ्कारमनसामिन्द्रियस्य च युगपत्क्रमशो वा वृत्तिः ।
दृष्टादृष्टविषययोस्त्रयस्य वृत्तिरिन्द्रियपूर्विका ॥

बुद्ध्यहङ्कारमनसामिन्द्रियस्य च युगपत्क्रमशो वा वृत्तिरिति । रूपदर्शने युगपन्महदहङ्कारमनश्चक्षुरिन्द्रियाणि सह प्रवृत्तानि एकं प्रमेयं गृह्णन्ति । यथा चक्षुस्तथावशिष्टानीन्द्रियाण्यपि । युगपच्चत्वारि सह प्रवर्तन्ते । एकं प्रमेयं समं गृह्णन्ति ।

1. अत्यन्तमन्येन विना रमते—MV.

2. Chinese text reads: *pu-kung-chi-shih*. It would be better to read: *pu-kung-chi-kung-shih*.

क्रमशो वृत्तिः, यथा कश्चि[1]त् पथि गच्छन् हठादुन्नतं वस्तु किञ्चित् दृष्ट्वा तदा उत्पन्नसंशयो भवति । स्थाणुर्वा पुरुषो वा इति । यदि शकुनिसमवायं पश्यति [1253] वेणुवलयं वा हरिणं वा समीपे पश्यति । तदा बुध्यते । अयं स्थाणुरिति । यदि चलं वस्त्रं पश्यति, यदि वाकुञ्चनं प्रसारणञ्च पश्यति । तदा बुध्यते अयं पुरुष इति । एवं बुद्ध्यहङ्कारमनइन्द्रियाणां क्रमशो वृत्तिः । यथा चक्षुर्दर्शनम् । तथा श्रोत्रादीनीन्द्रियाण्यपि क्रमिकानि ज्ञेयानि । दृष्टादृष्टविषययोस्त्रयस्य वृत्तिरिन्द्रियपूर्विकेति । दृष्टे धर्मे त्रयस्येन्द्रियाश्रया क्रमशो वृत्तिरुक्ता । इदानीमदृष्टेऽपि धर्मे त्रयस्येन्द्रियाश्रया वृत्ति र्वक्ष्यते । यथोक्तं गाथायाम् ।

युगावसानसमये भविष्यति यथा जनः ।
कुदृष्ट्याचारतो बुद्धधर्मसंघापवादकः ।
विकरिष्यति दुष्टःसन् पितृज्ञातिसुहृज्जनान् ।
चतस्रो दुर्गती[2]र्गत्वा नयिष्यति परानि[3]ह ॥

यथानागते तथा तीतेऽपि श्रोत्रेन्द्रियाश्रया क्रमशो वृत्ति र्धर्मत्रयस्य । एवं त्रिविधधर्मो बाह्येन्द्रियपूर्वकः प्रवर्तते ॥ ३० ॥

पर आह । त्रयोदशेमानि करणानि अचेतनानि यदि पुरुषेण ईश्वरेण वा नाधिष्ठितानि । कथं पृथक् पृथग् गृह्णन्ति स्वविषयम् । आर्ययोत्तरमाह ।

स्वां स्वां प्रतिपद्यन्ते परस्प[4]राकूतहेतुकां वृत्तिम् ।
पुरुषार्थ एव हेतु र्न केनचित्कार्यते करणम् ॥ ३१ ॥

1. This illustration is found both MV. and GB.

2. lit. अपात्रत्व.

3. These 2 verses are not found in MV. and GB. Takakusu notes that the mention of Ratnatraya is curious; and the Japanese commentators say that this verse is not Buddhistic.

4. or अन्यानुत्पन्नाम्. Takakusu remarks that Paramārtha seems to have ill understood *'parasparākūta'* 'mutual impulsion'; he says just the contrary. Though Paramārtha does not

Ch: त्रयोदशकमन्येन विना[1] स्वां वृत्तिं कुरुते ।
पुरुषार्थं [एव] हेतु र्नान्येन कार्यते करणम् ॥

त्रयोदशकमन्येन विना स्वां वृत्तिं कुरुत इति । शास्त्रेऽस्मिन् ईश्वरः पुरुषश्च न कर्तेत्युक्तं प्राक् । अतस्त्रयोदश करणानि यथास्वविषयं स्वयं कुर्वन्ति नान्येन । यथा[2]कश्चिद्ब्राह्मणो ब्रह्मचारी शृणो[3]ति कुत्रचित्प्रदेशे वेदाचार्योऽध्यापयति यथेष्टमधीयानान् । इति । [अध्यवस्यति] [4]अहमवश्यं तत्र गत्वा अध्येष्ये इति । अयमेव महत्कृतोऽध्यवसायः । अहङ्कारो महदाकूतमुपलभ्य एवं मन्यते । सर्वे ब्राह्मणा विद्यमानान्युपकरणानि संचिन्वते । अहं सर्वं नीत्वा गमिष्यामि तत्र गत्वा [मम] हृदयं मा शिथिलं भवतु । इति । मनोऽहङ्काराकूतमुपलभ्येमं संकल्पं करोति ।

translate it clearly in the verse; he explains it fully in the commentary. So it is improbable that he has ill understood the text. He might have taken the negative side of the text *'parasparākūta hetuka'* which in fact denies through positive method the ultimate cause such as Iśvara, of organs functioning apart from *puruṣārtha*; though this denial is stressed upon in the whole of the second line, because it is very important from the viewpoint of Sankhyas and Buddhists. Were the organs to act themselves for the sake of Puruṣa, they are to do so only through the impetus of the mutual impulsion. In this way the 'mutual impulsion is understood in affirming that the organs function themselves for Puruṣa's sake. If they act in their own way, without taking into account the intention (*ākūta*) of one another, the result would be chaos and not *puruṣārtha*.

1. See page 46. Foot-note No. 4.

2. This illustration is not found in MV. and GB.

3. So three eds. Other eds. read पृच्छति वदन् किमास्ति वेदाचार्यः [यः] अध्यापयति, etc.

4. Takak. translates this sentence thus: He decides to go, etc. Here the Chinese text reads E *chin* etc. Three eds. read *'ling'* for *'chin'* In both cases it is better to take in the sense *'aham'* than anything in the third person.

प्रथमं कं वेदमध्येष्ये । किं सामवेदमध्येष्ये । किं वा यजुर्वेदम् इति । बाह्येन्द्रियाणां मनस्संकल्पपरिज्ञाने चक्षुर्मार्गमवलोकयति । श्रोत्रमन्यवचनं शृणोति । करः कुण्डिकां धत्ते । पादः पन्थानं क्रामति । इति पृथक् पृथक् [स्वां] वृत्तिं कुर्वन्ति । यथा[1] चोराधिपः आज्ञां करोति । निर्गमने प्रवेशे धावने स्थितौ च सर्वेत्नावश्यं मां शृणुध्वमिति । सर्वोऽयं चोरसङ्घोऽनुसरत्याज्ञाम् । तथा इमानि इन्द्रियाण्यपि । बुद्धिश्चोराधिपोपमा । अवशिष्टानीन्द्रियाणि चोरसङ्घोपमानि बुद्ध्याकूतज्ञानात् [1253, c. 2] पृथक् पृथक् स्वां वृत्तिं कुर्वन्ति । पर आह । इमानि त्रयोदश करणानि प्रति प्रति पुरोवर्तिविषयान् गृह्णन्ति । किमिदं स्वार्थम् । उत परार्थम् । उत्तरमाह । पुरुषार्थ [एव] हेतुर्नान्येन कार्यते करणम् इति । अयमर्थः प्रागुक्तः । पुरुषार्थस्य कार्यत्वात् गुणाः सृजन्तीन्द्रियाणि [यानि] पुरुषार्थं विषयान् प्रकाशयन्ति आहरन्ति धारयन्ति च । यद्युच्यते भवता इमानीन्द्रियाण्यचेतनानि कथं प्रवर्तन्ते । उच्यते । एषामिन्द्रियाणां नास्त्यन्य ईश्वरः [य] स्तन्मध्यमागम्याधितिष्ठेत्तत्प्रवृत्त्युपदेशाय । केवलं पुरुषः प्रकृत्या युज्यमानः प्रवृत्त्युत्थापनायैवं मन्यते मम कैवल्यार्थं त्वया प्रकाशयितव्यम् । इति । एतत्पुरुषार्थहेतोस्त्रयो गुणा इन्द्रियाणि सृजन्ति । [तानि च] स्वस्ववृत्तिं पुरुषार्थवशात्कुर्वन्ति । अतः पुरुषार्थं विना नास्त्यन्यः व्यतिरिक्तः प्रवर्तकः ॥ ३१ ॥

पर आह । चतुर्विंशति [तत्त्वेषु] कति नाम तत्त्वानि करणानि । आर्ययोत्तरमाह ।

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।
कार्यश्च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यश्च ॥ ३२ ॥

Ch: करणसंख्या त्रयोदश, [इमानि] आहरणधारणप्रकाशकराणि ।
तेषां कार्यं दशविधमाहार्यं धार्यं प्रकाश्यञ्च ॥

करणसंख्या त्रयोदशेति । अस्मिन् शास्त्रे तत्र तत्रोक्तानि करणानि त्रयोदशैव

1. The same illustration is given in MV.

नियतानि । पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि बुद्ध्यहङ्कारमनांसि इति । एतानि त्रयोदश किं कार्यं कुर्वन्ति । आहरणधारणप्रकाशकराणि । तेषां कार्यं दशविधम् । शब्दादयः पञ्चविषयाः वचनादयः पञ्चवृत्तयः, एतानि दश तत्कार्याणि । [किञ्च] [1]तत्कार्यं त्रिविधम् । (१) आहार्यम् (२) प्रकाश्यम् (३) धार्यमिति । [2]तत्र त्रिभिराहृतं पञ्चज्ञानकरणैः प्रकाशितं पञ्चकर्मकरणानि धारयन्ति इत्येतत्कार्यत्रयस्य हेतोस्त्रयोदशेन्द्रियाणि व्यवस्थापितानि । अत उक्तमाहार्यं धार्यं प्रकाश्यमिति ॥ ३२ ॥

पर आह । कतीन्द्रियाणि त्रिकालविषयान् गृह्णन्ति । कतीन्द्रियाणि वर्तमानविषयान् गृह्णन्ति । आर्ययोत्तरमाह ।

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥

Ch: अन्तःकरणं त्रिविधं, दशबाह्यकरणानि त्रयस्य विषयाः ।
बाह्यं करणं साम्प्रतविषयं गृह्णाति, आभ्यन्तरं त्रिकालविषयं गृह्णाति ॥

अन्तःकरणं त्रिविधमिति । बुद्ध्यहङ्कारमनांसि त्रिविधानि । एतानि अन्तःकरणाख्यानि । बाह्यविषयाग्रहणाद् अन्तरित्याख्या स्थापिता । पुरुषार्थोपायसाधन-

1. Three eds. omit तत्कार्य.

2. lit. त्रयाणामाहृतमस्ति । etc. MV. assigns the threee functions *āharaṇa*, *dhāraṇa* and *prakāśa* to *indriyas*, *ahankāra* and *buddhi* respectively. Of the three groups, *āhārya*, *dhārya* and *prakāśya* into which the ten-fold kārya is divided, the first two are brought into relation with the organs of action and the last with the organs of cognition. GB. assigns no function to internal organs but distribute the said three functions among the ten organs as MV. does. CHC. as we read here, allots *āhārya* to the three internal organs, *prakāśya* to the organs of cognition and *dhārya* to the organs of action. STK. distributes them differently. *Aharaṇa* belongs to the organs of action *dhāraṇa* to the internal organs and *prakāśa* to the organs of cognition. Jaya follows STK.

समर्थत्वात्करणमित्युच्यते। दशबाह्यकरणानि त्रयस्य विषया इति। दशबाह्यकरणानि पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि बाह्यविषयान् गृह्णन्ति। अतो बाह्यकरणमित्याख्यायन्ते। त्रयस्य विषया इति। [त्रयस्य] बुद्ध्यहङ्कारमनइन्द्रियाणाम्। दश करणानि तद्विषया इष्यन्ते। यथा रजा प्रजा[1] नियोजयति। तथैव त्रीणीन्द्रियाणि दशकरणानि कारयन्ति। बाह्यं करणं साम्प्रतविषयं गृह्णाति इति। इमानि दशविधेन्द्रियाणि वर्तमानविषयगोचराणि। कथं ज्ञायते। श्रोत्रे [1253, c. 3] न्द्रियं साम्प्रतकालमेव शब्दं गृह्णाति। [इतर] कालद्वयेऽश्रवणात्। यथा श्रोत्रेन्द्रियम्। यावद् घ्राणेन्द्रियमप्येवम्। वागिन्द्रियं वर्तमाननामपदव्य[2]ञ्जनानि भाषते। अतीतानागतानि तु न भाषते। यथा वागिन्द्रियम्। तथावशिष्टानि चत्वार्यपि। आभ्यन्तरं त्रिकालविषयं गृह्णाति। इति। बुद्ध्यहङ्कारमनांसि त्रिविधानि त्रिकालविषयान् गृह्णन्ति। बुद्धिः साम्प्रतघटशरावादीन् गृह्णाति। अतीतमपि गृह्णाति। यथा[3] पुरा मान्धाता [नाम] राजा बभूव इत्यादि। अनागतमपि गृह्णाति। यथा[4] जनानां नाशो भविष्यतीत्युच्यते। तथाहङ्कारोऽपि त्रिकालविषयान् मदीयमिति मन्यते। एवं मनइन्द्रियमपि त्रिकालविषयान् संकल्पयति। अनागतं प्रार्थयते। अतीतं स्मरति च। अत उक्तं आभ्यन्तरं त्रिकालविषयं गृह्णाति इति ॥ ३३ ॥

पर आह। कतीन्द्रियाणि सविशेषं विषयं गृह्णन्ति। कतीन्द्रियाणि निर्विशेषं विषयं गृह्णन्ति। आर्ययोत्तरमाह।

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि।
वाग्भवति शब्दविषया शेषाण्य[5]पि पञ्चविषयाणि ॥ ३४ ॥

Ch: त्रयोदशमध्ये बुद्धीन्द्रियाणि विशेषाविशेषविषयान् गृह्णन्ति।
वाक् शब्दमात्रविषया शेषाणां चतुर्णां पञ्चापि विषयाः ॥

1. lit. नीचजन। आभ्यन्तरं त्रिकं स्वामिभूतं बाह्यं दशविधं भृत्यभूतमित्यर्थः–MV.
2. See p. 39, n. 3
3. तद्यथा युधिष्ठिरभीमसेनावास्ताम्—MV. मान्धातासीत्–Jaya.
4. कल्की भविष्यति—MV. कल्की राजा भविष्यति—Jaya.
5. So MV. and GB. STK. Jāya and Candrikā read : शेषाणि तु.

त्रयोदशमध्ये बुद्धीन्द्रियाणि विशेषाविशेषविषयान् गृह्णन्ति इति। एषां त्रयोदशकरणानां मध्ये पञ्चबुद्धीन्द्रियाणि सविशेषनिर्विशेषविषयान् गृह्णन्ति। सविशेषास्त्रिगुणमयाः। निर्विशेषाः केवलैकगुणाः। यथा स्वर्गे पञ्चविषयाः शब्दस्पर्शरूपरसगन्धाख्याः। एते पञ्चविषया निर्विशेषाः। समसत्त्वात्मकत्वात्। एते पञ्चविषया अरजस्तमस्काः। मनुष्यगतौ पञ्चविषयाः सविशेषाः सत्त्वरजस्तमोयोगसिद्धाः। तस्माद्देवानां बुद्धीन्द्रियाणि निर्विशेषविषयान् गृह्णन्ति। मनुष्याणां बुद्धीन्द्रियाणि तु सत्त्वरजस्तमोरूपविशेषवद्विषयान् गृह्णन्ति। तस्मा[दुक्तं] बुद्धीन्द्रियाणि विशेषाविशेषविषयान् गृह्णन्ति। इति। वाक् शब्दमात्रविषयेति। देववाक् मनुष्यवाक् च शब्दमात्रविषया नामपदव्यञ्जनानि भाषते। शेषाणां चतुर्णां पञ्चापि विषया इति। पाणी[1]न्द्रियं पञ्चविषयात्मकं पञ्च[ात्मक]विषयान् गृह्णाति। तद्यथा पाणिर्घटं गृह्णाति। यथा पाणिः, तथा शेषाण्यपीन्द्रियाणि। एवं चत्वरीन्द्रियाणि पञ्चविषय[2]संस्थानानि पञ्च[ात्मक]विषयान् गृह्णन्ति ॥ ३४ ॥

अथेन्द्रियाणां लक्षणान्तर[3]मार्ययाह।

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ ३५ ॥

Ch: बुद्धिः सान्तःकरणा सर्वं विषयमवगाहते।
तस्मात्त्रिविधं करणं द्वारि इन्द्रियाणि सर्वाणि द्वाराणि ॥

बुद्धिः सान्तःकरणा सर्वं विषयमवगाहते। इति। बुद्धेरहङ्कारेण मनइन्द्रियेण सदा योगाद् उक्तं बुद्धिः सान्त[4]ःकरणेति। त्रिलोकान् विषयान् त्रिकालान् विषयांश्चावगाहते। अत उक्तं सर्वं विषयमवगाहत इति। तस्मात्त्रिविधं करणं द्वारि। इति। बुद्ध्यादि त्रिविधं करण[मात्मानं] द्वाराणामधिपं करोति।

1. Three eds.: पाणिपादेन्द्रिय
2. (?) = *an-li*
3. Three eds. read इन्द्रिय for लक्षण.
4. Ming ed.: संस्करण.

यदि बुद्ध्यादि त्रिविधं करणं सुयुक्तं[1254] च [1]क्षुरिन्द्रिये वर्तते । [तदा] तच्चक्षुरिन्द्रियं रूपं प्रकाशयति न शेषणीन्द्रियाणि । इमानि त्रीणि[करणानि] एकेन्द्रियसमवायात् त्रिलोकविषयान् त्रिकाल[विषयां]श्चावगाहन्ते । तस्मादुच्यते इमानि त्रीणि[करणानि] दशकरणान्यधिति[2]ष्ठन्ति इति । शेषाणि इन्द्रियाणि सर्वाणि द्वाराणि इति । यदुत पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि । त्रि[करणा]नुसारित्त्वाद् विवृतानि संवृतानि वा भवन्ति । यदि त्रिकं चक्षुषि वर्तते । तदा चक्षुर्द्वारं विवृतं पुरोवर्तिविषयमवगाहते । शेषाणि द्वाराणि तु संवृतानि विषयं नावबुद्ध्यन्ते । अन्यानुसारित्वात् केवलं द्वाराणि न वस्तुतः करणानि । एवं दशेन्द्रियाणि त्रिविधकरणेन संयुक्तानि सर्वान् त्रिलोकविषयानवगाहन्ते ॥ ३५ ॥

किञ्चार्यामाह ।

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति[3] ॥ ३६ ॥

Ch: करणानि प्रदीपकल्पानि गुणमनुसृत्य परस्परविलक्षणानि ।
त्रिलोकविषयान् प्रकाश्य पुरुषार्थं बुद्धौ प्रयच्छन्ति ॥

करणानि प्रदीपकल्पानीति । यदुत पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि अहङ्कारो मनइन्द्रियञ्च । यथा प्रदीप एकत्रावस्थितः पदार्थान् समं प्रकाशयति । एवं करणानि त्रीलोकविषयान् प्रकाशयन्ति । अत उक्तं प्रदीपकल्पानीति । गुणमनुसृत्य परस्परविलक्षणानीति । परस्परविधर्माणि । श्रोत्रं शब्दं गृह्णाति न रूपम् ।

1. Three eds.: चक्षुषि वर्तते । तच्चक्षुः etc.
2. Read. '*chih*' for *wei* (Takak.)
3. According to CHC. the reading seems to be गुणविशेषात् for ... षाः and पुरुषार्थं (=पुरुषाय) for पुरुषस्यार्थम्. Though the reading *puruṣārtham* is metrically deefctive, it is supported by Cakrapāṇi, a commentator on Carakasamhitā who cites this verse in his commentary (v. Śārīras. 1. 19) with the variation प्रदोषकल्प for प्रदीप—and पुरुषार्थं for पुरुषस्यार्थम्.

चक्षुस्तु रूपं गृह्णाति न शब्दम् । यावन्नासिका केवलं गन्धं गृह्णाति न रसम् । ज्ञानेन्द्रियेषु इन्द्रियं प्रतिविषयं नियतं विलक्षणञ्च । अत उक्तं परस्परविलक्षणानीति । कर्मेन्द्रियमप्येवम् । वाक् केवलं भाषणं व्यवहरति । न शेषां वृत्तिं करोति । यावद्बुद्धिः केवलमध्यवसायं करोति । अहङ्कारः केवलमभिमानं करोति । मनः केवलं संकल्पं करोति । अतोऽप्युक्तं परस्परविलक्षणानीति । तद्वैलक्षण्यं कथम् । त्रीन्[1] गुणाननुसृत्याहङ्कारो विषमः [2]प्रवर्तते । अत अहङ्कारः पञ्चतन्मात्राणि इन्द्रियाणि च सर्वाणि विषमाणि सृजति । त्रिलोकविषयान् प्रकाश्य पुरुषार्थं बुद्धौ प्रयच्छन्तीति । इमानि द्वाद[3]शेन्द्रियाणि लोकविषयान् प्रकाश्य सर्वान्[4] बुद्धौ प्रयच्छन्ति । [5]यथा राष्ट्रे सर्वेऽमात्यजना देशधनानि संगृह्य राष्ट्रपालाय प्रयच्छन्ति । एवं विषया द्वादशेन्द्रियैर्बुद्धौ प्रदीयन्ते । अतो [6]बुद्धिः पुरुषं [विषयान्] प्रदर्शयति । अत उक्तं पुरुषार्थं बुद्धौ प्रयच्छन्तीति ॥ ३६ ॥

पर आह । कस्मादिन्द्रियाणि विषयान् प्रकाश्य न स्वयं पुरुषाय प्रदर्शयन्ति । आर्ययोत्तरमाह ।

1. So Three eds. Other eds. त्रिगुणानुसारित्वात् त्रिगुणा उत्पद्यन्ते । अहङ्कारः etc.
2. Yuan ed. adds 'न'
3. Three eds. त्रयोदश
4. Ibid. 'विषमान्' added.
5. There is no ex. in MV. and GB. All the commentators say that the 12 organs transmit their respective objects directly to the intellect. But STK. states that 10 organs communicate their objects to the mind which in turn passes on to *ahankāra* and the latter again to the intellect. It has also made an interesting compsrison. The village head men collect taxes from people and submit to the district authorities who in turn remit to the ministers aud the latter again to the king.
6. Three eds. omit अतो बुद्धिः

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि [1]ततः प्रधानपुरुषान्तरं सूक्ष्मम् ।। ३७ ।।

Ch: पुरुषस्य सर्वं प्रत्युपभोगं यस्माद् बुद्धिः साधयति ।
किञ्च पश्चात्काले प्रधानपुरुषयोः सूक्ष्ममन्तरं दर्शयति ।।

पुरुषस्य सर्वं प्रत्युपभोगं यस्माद्बुद्धिः साधयति इति । पुरुषस्योपभोगः सर्वत्र न समः । यदि वा मनुष्यगतौ यदि वा देवगतौ[2] यदि वा तिर्यग्गतौ दशविषयोपभोगो यावदष्टैश्वर्योपभोगं [न समः] । [3]ज्ञानेन्द्रियकर्मेन्द्रिय[4]दशबाह्यकरणानि इमान् विषयान् प्रकाश्य [1251, c. 2] बुद्धावर्पयन्ति । बुद्धिः पुरुषेऽर्पयितुं स्वीकरोति । तेन पुरुष उपभोगं लभते । अनेन च हेतुना बुद्धिः क्रमशः पुरुषं यथेष्टमुपभोक्तारमैश्वर्यसुखस्य लाभिनं च करोति यावत्प्रज्ञा नोत्पद्यते[5] । किञ्च पश्चात्काले प्रधानपुरुषयोः सूक्ष्ममन्तरं दर्शयति । इति । पश्चात्कालः प्राज्ञप्रादुर्भावकालः । प्रधानपुरुषौ [6]विविक्तावितीमं विवेकमनभ्यस्ताचार्यचर्या जना न पश्यन्ति । अत उक्तं सूक्ष्ममिति । सा च विविक्ते द्वारमिति त्रयोदशके बुद्धिरेव पुरुषं दर्शयति । दर्शनं किंलक्षणम् । यदुत प्रधानपुरुषौ भिन्नौ, त्रयो गुणा भिन्नाः, बुद्धिर्भिन्ना, अहङ्कारो भिन्नः, एकादशेन्द्रियाणि भिन्नानि, पञ्चतन्मात्राणि भिन्नानि, पञ्चमहाभूतानि भिन्नानि

1. So MV. GB.s reading is uncertain. Jaya and Candrikā read पुनः. CHC. and STK. read पश्चात्.
2. Ming ed : महद्गतौ
3. Ibid. भोगज्ञापकज्ञान.
4. Ming and Yuan eds.: कर्मलक्षण
5. MV. explains this point with an illustration. The intellect makes Puruṣa enjoy things just like a hetaera pleases her lover by according many receptions of ghee and others. Again for the point that the 12 organs accomplish things neither for their own sake, nor for the intellect, but for Puruṣa, MV. illustrates that maiden servants in the house of a rich hetaera prepare things neither for their own sake nor for their mistress but for her lover.
6. Three eds omit विविक्त.

शरीरं भिन्नमिति दर्शनम् । एवमादिभेदबुद्धिः पुरुषस्य ज्ञानमुत्पादयति । तस्मात्पुरुषो मोक्षं लभते । यथोक्तं प्राक्[1] । पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत् । जटी मुण्डो शिखी वापि मुच्यते नात्र संशयः ।। इति । तस्मात्केवलं बुद्धिरेका पुरुषस्य[2] वस्तुतः करणम् ।। ३७ ।।

पर आह । पूर्वमार्यायामुक्तमिन्द्रियाणि विशेषाविशेषविषयान् गृह्णन्ति इति । के [ते] विशेषाविशेषाः । आर्ययोत्तरमाह ।

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ।। ३८ ।।

Ch: पञ्चतन्मात्राण्यविशेषाः तेभ्य उत्पन्नानि पञ्चभूतानि ।
भौतिकविषयाः सविशेषा यदुत शान्ता घोरा मूढाश्च ।।

पञ्चतन्मात्राण्यविशेषा इति । भवानाह स्म । के विशेषाविशेषा इति । अधुना समाधास्यते । अहङ्कारादुत्पद्यन्ते पञ्चतन्मात्राणि सूक्ष्माणि शान्तानि सत्त्वलक्षणानि च । एतान्येव देवानां विषया अविशेषाश्च[3] । देवानां[4] शोकमोहाभावात् । तेभ्य उत्पन्नानि पञ्चभूतानि । भौतिकविषयाः सविशेषा इति । शब्दतन्मात्रादाकाशमुत्पन्नम् । यावद् गन्धतन्मात्रात्पृथिवी उत्पन्ना । इमानि पञ्चभूतानि सविशेषाणि । इमे विशेषाः किंलक्षणाः । (१) शान्ताः (२) घोराः (३) मूढाश्च । तानि पञ्चमहाभूतानि मनुष्यविषयाः । आकाशमहाभूतस्य कानि त्रीणि लक्षणानि । यथा कश्चिन्महान् धनिकः गर्भगृहमन्तः प्रविश्य पञ्चकामसुखान्यनुभुङ्क्ते । कदाचिदुन्नतं प्रासादमारुह्य सुदूरमाकाशमहाभूतं पश्यति । [तेन] आकाशेन सुखमनुभवतीत्यतः शान्तम् । अथवा उन्नते प्रासादे निविष्टः आकाशशीतवातेन स्पृश्यते । तदा आकाशं दुःखजनकम् । अथवा पुनः कश्चिन् महत्यध्वनि चरन् केवलमाकाशं

1. Id. omits यथोक्तं प्राक् and reads श्मश्रुकेशवान् मुण्डी वा. etc. See p. 5, n. 3.
2. We may also read here आत्मतत्त्वकरण.
3. Three eds. अपौरुषेयविशेषाः
4. Ibid. राजसविषया.

पश्यति । न ग्रामसमुदायं पश्यति । विश्रान्तिस्थानञ्च नास्ति । तदा मोहजनकम् । तथा[1]शेषाणि महाभूतान्यपि । एवं देवानां पञ्चतन्मात्राणि विषया एकान्तशान्ता इत्यविशेषाः । मनुष्या महाभूतविषयाः । महाभूतानि च त्रिगुणवन्ति । तस्मात्स-विशेषाणि ॥ ३८ ॥

पर आह । विशेषा यथाविभागमुक्ताः । किमिम एव विशेषा[2]: किं वा पुनरन्ये विशेषाः सन्ति । समाधीयते । पुनरन्ये विशेषास्सन्ति । यथाहार्या ।

[1254, c. 3] **सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः ।**
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ ३९ ॥

Ch: सूक्ष्मा मातापितृजाः प्रभूता [इति] त्रिविधा विशेषाः ।
त्रिषु सूक्ष्मा नियताः शेषा निवर्तन्ते ॥

सूक्ष्मा मातापितृजाः प्रभूता [इति] त्रिविधा विशेषा इति । सर्वाणि त्रिषु लोकेषु आदौ सूक्ष्मशरीराणि केवलतन्मात्रकान्युत्पन्नानि । तानि सूक्ष्मशरीराणि गर्भाशयं प्रवि[3]शन्ति । शुक्रशोणितसंयोगः सूक्ष्मशरीरं वर्धयति । षड्विधा अन्नपानरसा आप्यायिताः स्थूलशरीरस्योपचयं वृद्धिञ्च पुष्णन्ति । मातुः पुत्रस्य चान्नपानमार्गौ संयुक्तौ । अतः [स्थूलशरीरं] पोषितं वर्धते । यथा वृक्षो मूले जलद्वारयुक्तत्वाद् आप्याययन् वर्धते । एवमयमन्नपानरसः तद्गमनमार्गेणान्तः प्रविश्य स्थूलशरीरं वर्धयति । [4]यादृशं सूक्ष्मशरीरस्य प्रमाणं, स्थूलशरीरस्यापि तादृशम् । सूक्ष्मशरीरमाभ्यन्त-

1. MV. explains fully the three aspects of the other 4 elements also.

2. '*shih*' = विष = प्रकार = विशेष.

3. MV. explains how the subtle body enters the womb. The opinion of Vedāntavādins is quoted according to which the living beings after enjoyment in the heaven or suffering in the hell enters into disk of the moon, after that, they become rains and then transform into food stuff which again turn into semen and blood and enter the womb.

4. lit. यथा...तथा.

रमुच्यते । स्थूलशरीरं बाह्यमुच्यते । सूक्ष्मशरीरेऽस्मिन् पाणिपादशिरोमुखोदरपृष्ठं मनुष्यलक्षणं पूर्णं भवति । यथा वदन्ति महर्षयश्चतुर्वेदेषु[1] । स्थूलशरीरं षडाश्रयम् । रक्तमांसस्नायूनि त्रिविधा मातृजाः । शुक्रम[2]जास्थीनि त्रिविधाः पितृजाः । एते षड् देहाश्रया [इति] । बाह्येन स्थूलशरीरेणाभ्यन्तरं सूक्ष्मशरीरं वर्ध्यते । अस्याभ्यन्तरसूक्ष्मशरीरस्य स्थूलशरीरेणोपचितस्य गर्भाशयान्निर्गमकाले निर्गते च बाह्यपञ्चमहाभूतानि तद्विहृतिस्थानानि भवन्ति । यथा राजपुत्रस्य अन्ये नानाप्रासदकक्षं गृहं कुर्वन्ति । इदं स्थानं विहरणयोग्यं, इदं स्थानं भोजनयोग्यं, इदं स्थानं स्वापयोग्यमिति । तथा प्रधानमपि सूक्ष्मस्थूलशरीरयोराश्रयस्थानकरणाय पञ्चमहाभूतानि सृजति । (१) आकाशमहाभूतमवकाशने सृजति । (२) पृथिवीमहाभूतं विहरणे सृजति । (३) अब् महाभूतं शुद्धौ सृजति । (४) तेजोमहाभूतमाहारपचने सृजति । (५) वायुमहाभूतं व्यूहने सृजति । एवं त्रिविधा विशेषाः (१) सूक्ष्माः (२) मातापितृजाः (३) शान्तघोरमूढात्मकप्रभूतानि । इमे त्रयोऽन्ये विशेषा उच्यन्ते । पर आह । एषु त्रिषु विशेषेषु कति नित्याः कत्यनित्याः । उत्तरमाह । त्रिषु सूक्ष्मा नियताः शेषा निवर्तन्ते । इति । एषां त्रयाणां मध्ये पञ्चतन्मात्राणि दृष्टानि । सूक्ष्मा विशेषा आद्यशरीरजनका नियताश्च । यदा स्थूलशरीरं निवर्तते, सूक्ष्मशरीरञ्च यद्यधर्मयुक्तम् । तदा [3]चत्वारि जन्मान्युपादत्ते । (१) चतुष्पात्, (२) पक्षी, (३) उरगः, (४) तिर्यग् इति । यदि धर्म[4]युक्तम् । तदा चत्वारि जन्मान्युपादत्ते । (१) ब्रह्मा, (२) देवः (३) प्रजापतिः, (४) मनुष्य इति । एवं सूक्ष्मशरीरं

1. शिश्न वदन्ति । रुधिरमांसत्वचो मातृजाः । स्नाय्वस्थिमज्जानः पितृजाः – MV. रुधिरमांसस्नायुशुक्रास्थिमज्जासंभृतम् —GB. मातृतो लोमलोहितमांसानि. पितृतस्तु स्नाय्वस्थिमज्जान इति षट् कोशाः—STK.

2. Chinese text reads केश.

3. पशुमृगपक्षिसरीसृपस्थावरान्तानि पञ्च स्थानानि—MV. GB. gives the same 5 *sthānāh.*

CHC. speaks of 5 *sthānas* ad k. 44 adding *sthāvara* to the four mentioned here and calls the 2nd sthāna '*pataga*'.

4. धर्मवशादिन्द्रादिलोकेषु— GB. धर्माधर्मयोः साम्येन ब्राह्मणादीनि चन्डालान्तानि [पञ्च]—MV.

तु नियतं सत् संसरत्यष्टसु स्थानेषु । यावत् ज्ञानवैराग्ये नोत्पन्ने स्तः । ज्ञानवैराग्ये यद्युत्पन्ने । तदा एतच्छरीरमुक्तो मुच्यते । अत उक्तं सूक्ष्मा विशेषा नित्या इति । शेषाः स्थूलविशेषा निवर्तमाना अनित्या इत्युच्यन्ते । [1255] मरणकाले सूक्ष्मशरीरं स्थूलशरीरमुत्सृजति । एतत् स्थूलशरीरं मातापितृजातं यदि वा पक्षिभिः खाद्यते यदि वा पूतिकं शीर्यते यदि वाग्निना दह्यते । मूढस्य सूक्ष्मशरीरं संसारे संसरति ॥ ३९ ॥

पर आह । भवतोक्तं मातापितृ[जं] शरीरं निवर्तत इति । किं पुनः शरीरं संसरति संसारे । आर्ययोत्तरमाह ।

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४० ॥

Ch: पूर्वोत्पन्नं शरीरमसक्तं[नियतं] महदहङ्कारपञ्चतन्मात्रकम् ।
संसरति निर्विषयोपभोगं भावैरधिवासितं लिङ्गम् ॥

पूर्वोत्पन्नं शरीरमसक्तमिति । पुरा प्रधानं प्रवर्तमानं सत् लोकमसृजत् । सूक्ष्मशरीरं प्रथममजायत । प्रधानाद्बुद्धिरजायत । बुद्धेरहङ्कारोऽजायत । अहङ्कारात्पञ्चतन्मात्राण्यजायन्त । एतानि सप्त सूक्ष्म[1]शरीरमित्युच्यते । सूक्ष्मशरीरलक्षणं कीदृशम् । ब्रह्मरूपसदृशम् । विषयाननुभूय पश्चादेतच्छरीरं मोक्षमाप्नोति । असक्तमिति । यथोक्तमाचार्यैः । एतत्सूक्ष्मशरीरं तिर्यङ्मनुष्यदेवगतिषु स्थितमपि, पर्वतपाषाणभित्त्यादिना न प्रतिहन्तुं शक्यते । सूक्ष्मत्वात् ॥ इति । न च विक्रियते । यावत् प्रज्ञा नोत्पद्यते [तावत्] सदा न वियुज्यते । इदं नियतमाख्यायते । महदहङ्कारपञ्चतन्मात्रकमिति । एतच्छरीरं कतिभिस्तत्त्वैः सिद्ध्यति । सप्तविधसूक्ष्मतत्त्वैः । षोडशविधस्थूलतत्त्वपर्यन्तैः इदं शरीरं किं करोति । संसरति, निर्विषयोपभोगम् । तत्सूक्ष्मशरीरमेकादशेन्द्रियसंयुक्तं कदाचित् चतुर्षु जन्मसु प्रविष्टं त्रीन् लोकान्

1. According to MV. STK. and Jaya 13 organs and 5 fine elements constitute the subtle body. But CHC. and perhaps GB. also take it to be consisting of 3 internal organs and 5 fine elements.

संसरति । निर्विषयोपभोगमिति । यद्येकादशेन्द्रियासंयुक्तम् । यदि मातापितृजातस्थूलशरीररहितम् । [तदा] विषयोपभोगशक्तिर्नास्ति । भावैरधिवासितं लिङ्गमिति । सूक्ष्मशरीरस्य भावाः त्रिविधाः । [तैः] भावैरधिवासितम् । इमे त्रयो भावाः पश्चाद्वक्ष्यन्ते । (१) सांसिद्धिकभावः (२) प्राकृतिकभावः (३) वैकृतभाव इति भावास्त्रिविधाः । एभिस्त्रिभिर्भावैरधिवासितं सूक्ष्मशरीरम् । लिङ्गमिति । अनार्यैरदृष्टत्वात् । तत्सूक्ष्मशरीरं संसरति संसारे ॥ ४० ॥

पर आह । एभिः त्रयोदशेन्द्रियैः संसारे संसरणायालम् । किं मिथ्यासूक्ष्मशरीरेण । आर्ययोत्तरमाह ।

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया ।
तद्वद्विना[1]ऽविशेषैस्तिष्ठति न निराश्रयं लिङ्गम् ॥ ४१ ॥

Ch: यथा चित्रं भित्तिमृते न, स्थाण्वादिभ्यो विना न छाया ।
[तद्वत्] पञ्चतन्मात्रशरीरवियुक्तश्चेत्, त्रयोदशकं निराश्रयं तिष्ठति ॥

यथा चित्रं भित्तिमृते न, स्थाण्वादिभ्यो विना न छाया ।इति । लोकेऽस्मिन् आधाराधेयौ द्वौ धर्मौ संयुक्तौ दृष्टौ न वियुक्तौ । यथा चित्ररूपं भित्त्याश्रयम् । भित्तिं विहाय पृथङ् न तिष्ठति । तस्मात्सूक्ष्मशरीरं विहाय त्रयोदशकं न स्थातुं क्षमते । किञ्च-स्थाणुं विना छाया निराश्रया । अग्निविरहे प्रकाशो नास्ति । जलविरहे शैत्यं नास्ति । वायुविरहे [1255, c. 2] स्पर्शो नास्ति । आकाशं विना नेर्यापथः सिद्ध्यति[2] । एवं सूक्ष्मशरीरं विना स्थूललिङ्गं निराश्रयमुपरमते न तिष्ठति । तस्मादुक्तं पञ्चतन्मात्रशरीरवियुक्तश्चेत्, त्रयोदशकं निराश्रयं तिष्ठतीति ॥ ४१ ॥

पर आह । इदं सूक्ष्मशरीरं त्रयोदशकेन सह किमर्थं संसारे संसरति । आर्ययोत्तरमाह ।

1. So MV. GB. and Jaya. But STK. and Candrikā read विशेष. CHC. seems to read अविशेषैश्चेत्तिष्ठति निराश्रयं लिङ्गम्.

2. GB. adds पृथिवी गन्धं विना.

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥

Ch: पुरुषार्थहेतुकं निमित्तनैमित्तिकहेतोः ।
प्रकृतेर्विभुत्वशक्त्यनुसारात् नटवत्प्रवर्तते लिङ्गम् ॥

पुरुषार्थहेतुकमिति । पुरुषार्थस्य कर्तव्यत्वात् प्रधानं विक्रियते । [पुरुष]ार्थो-द्विविधः । (१) शब्दाद्युपलब्धिराद्यः (२) गुणपुरुषान्तरदर्शनमन्तिमः । ब्रह्म-पदादिषु पुरुषाः शब्दादिविषयैः संयुज्यन्ते । संयुक्ताः पश्चाद्विमुच्यन्ते । अतः प्रधानं सूक्ष्मशरीरं विकरोति । इदं सूक्ष्मशरीरं किंनिमित्तं संसरति । निमि[1]त्तनैमित्तिक-हेतोः । निमित्तं यदुत धर्मा[2]दीनि अष्टविधानि पश्चाद्वक्ष्यन्ते । आर्यमेवाह ।

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः[3] ॥

इमानि निमित्तनैमित्तिकानि पुनः किंनिमित्तं सिद्ध्यन्ति । प्रकृतेर्विभुत्व-शक्त्यनुसारादिति । यथा [कश्चित्] राष्ट्रपालः स्वराष्ट्रे अर्थानुसारात् [कार्यं]करोति । तथा प्रधानमपि देवमनुष्यतिर्यगादिसर्गं करोति । अत उक्तं न[4]टवत्प्रवर्तते लिङ्गमिति । यथा नटः कदाचिद्देवरूपो दृश्यते । कदाचिद्राजरूपो दृश्यते । कदाचिन्नागपिशाचादिरूपो विचित्रो विभिन्नश्च दृश्यते । सूक्ष्मशरीरमप्येवं त्रयोदशकेन संयुक्तं कदाचिद्गजाश्वादि-कुक्षिं प्रविश्य गाजाश्वाद्यात्मना परिणमते । कदाचिन्मनुष्यदेवादिकुक्षिं प्रविश्य मनुष्यदेवात्मना परिणमते । अत उक्तं प्रकृते र्विभुत्वशक्त्यनुसारान्नटवत्प्रवर्तते लिङ्गमिति ॥ ४२ ॥

पर आह । उक्तं प्राक् त्रिविधै र्भावैरधिवासितानि त्रयोदशेन्द्रियाणि संसारे संसरन्ति । इति । के[ते]त्रिविधा भावाः । आर्ययोत्तरमाह ।

---

1. Three eds. omit निमित्त.
2. Read '*fa*' धर्म for *ching* 'pure'.
3. See ver. 44.
4. MV. does not explain this, but agrees in all other respects with CHC.

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥ ४३ ॥

Ch: सांसिद्धिकाः प्राकृतिका वैकृता [इति] त्रयो भावाः ।
दृष्टा अन्तःकरणाश्रयिणः सूक्ष्माश्रयिणश्च कललाद्याः ॥

सांसिद्धिकाः प्राकृतिका वैकृता[इति] त्रयो भावा इति । सर्वभावा भाना-ख्यास्त्रिविधाश्च भवन्ति । (१) सांसिद्धिकाः (२) प्राकृतिकाः (३) वैकृता इति । सांसिद्धिका यथा कपिलमुनेरादौ सहजाश्चत्वारो गुणाः (१) धर्म (२) ज्ञान (३) विराग (४) ऐश्वर्याणीति । इमे चतुर्विधा गुणाः सांसिद्धि [1255, c. 3] काः । अतस्ते चत्वारो गुणाः सांसिद्धिकभावाश्रयिणः । के प्राकृतिकाः । प्राकृतिका इति । यथोक्तं वेदे । पुरा[किल] ब्रह्मणश्चत्वारः पुत्राः समजायन्त (१) सनक (२) सनन्दन (३) सनातन (४) सनत्कुमारनामानः । एषां चतुर्णां पुत्राणां संपूर्णकरणकार्याणां शरीरवतां षोडशवर्षे चत्वारो भावा अकस्मात्सिद्धा धर्मज्ञान-विरागैश्वर्याख्या अकस्मान्निधि[1]दर्शनलाभवत् [इति] । एते चत्वारो भावा न निमित्त-लब्धाः । अतः प्राकृतिका इत्युच्यन्ते । वैकृता भावा इति । वि[2]कृतिर्नामाचार्यमूर्तिः । आचार्यमूर्तिनिमित्तात् शिष्याः सगौरवं सभक्ति चोपगम्य श्रुत्वा ज्ञानं लभन्ते । ज्ञाना-द्वैराग्यं लभन्ते । वैराग्याद्धर्मं लभन्ते । धर्मादष्टविधमैश्वर्यं लभन्ते । इमे शिष्यगुणाश्च-त्वार आचार्यमूर्तिलब्धत्वाद् वैकृता उच्यन्ते । एभिश्चतुर्भिर्गुणैरधिवासितं [3]महदादि अन्तःकरणं संसरति संसारे । एते चत्वारो गुणाः प्रतिपक्षैःसह अष्टविधाः । इमेऽष्टधर्माः किमाश्रित्य वर्तन्ते । उत्तरमाह । दृष्टा अन्तःकरणाश्रयिणः सूक्ष्माश्रयिणश्च कल-लाद्या इति । अन्तःकरणं यन्म[4]हदादि । समहानष्टभावयुक्तः । [5]चत्वारो महदाश्रयिणो वर्तन्ते । यथोक्तं प्राक् ।

---

1. Not in GB.
2. So also GB.
3. We ought to read here लिङ्ग or सूक्ष्मशरीर.
4. MV. gives 13 organs as basis, while GB. gives only the intellect as basis.
5. The better reading would be अष्टौ.

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्[1] ॥ इति ।

इमेऽष्टविधा अन्तःकरणाश्रयिणःसिद्धाः । तेऽष्टभावाश्चार्यजनैर्दिव्यचक्षुषा दृष्टाः । अत उक्तं दृष्टा इति । सूक्ष्माश्रयिणश्च कललाद्या इति । यदष्टविधशरीरा[2]णि (१) कलल (२) बुद्बुद (३) पेशी (४) घन[मांस] (५) गर्भ (६) कुमार (७) यौवन (८) स्थाविराख्यानि । इमान्यष्टविधानि चतुर्भिरन्नरसै र्वृद्धिं लभन्ते । (१) मातृनिमित्ताः षड्रसाश्चत्वारि शरीराणि वर्धयन्ति । (२) क्षीररसाद् गर्भ-शरीरं वर्धते । (३) स्तन्यपानात् कौमारशरीरं वर्धते । (४) अवशिष्टाहारनि-मित्तो रसोऽन्तिमे द्वे शरीरे वर्धयति । एतदष्टविधं शरीरं सूक्ष्मशरीरमाश्रित्य सिद्ध्यति । इमे षोडश पदार्था अन्तःकरणमधिवासयन्ति । सूक्ष्मशरीरञ्च संसरति संसारे ॥ ४३ ॥

पर आह । निमित्तनैमित्तिकहेतो र्नटवत्प्रवर्तते लिङ्गमिति प्रागुक्तम् । [तत्र] किं निमित्तं किं नैमित्तिकम् । उत्तरमाह ।

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ ४४ ॥

Ch: धर्मेण गमनमूर्ध्वमधर्मेण गमनमधस्तात् ।
ज्ञानोद्वेगाभ्यामपवर्गः तद्विपर्ययश्चेत्तदा बन्धः ॥

लोके यदि मनुष्यो यमनियमादि धर्मं करोति । तेन धर्मेण जन्मोपादनकाले [।256] सूक्ष्मशरीरमूर्ध्वं गत्वा अष्टसु स्थानेषु उत्पद्यते । (१) ब्राह्मम् (२) प्राजा-पत्यम् (३) ऐन्द्रम् (४) गान्धर्वम् (५) याक्षम् (६) राक्षसम् (७) [3]यामम् (८) पैशाचम् इत्यष्टस्थानेषु जन्म लभते । यदि तद्दशविधधर्मविपरीतमधर्मं करोति । जन्मोपादनकाले अधो गत्वा पञ्चसु स्थानेषु उत्पद्यते । (१) चतुष्पात् (२) पतग

1. See the verse 23 above.
2. '*wu*' lit. भाव-
3. MV. reads पित्र्य for याम placing it 4th in the order. GB. speaks of the third *sthāna saumya* and omit याम.

(३) उरग (४) तिर्यक् (५) [1]स्थावरेषु पञ्चसु स्थानेषु अधर्मेणोत्पद्यते । ज्ञानो-द्वेगाभ्यामपवर्ग इति । सूक्ष्मशरीरेण ज्ञानं लभते ज्ञानेन वैराग्यं लभते । वैराग्येण सूक्ष्मशरीरं त्यजति । पुरुषकैवल्यादपवर्ग इत्याख्यायते । तद्विपर्ययश्चेत्तदा बन्ध इति । ज्ञानविपरीतमज्ञानम् । यथा पुरुषो वदति अहं अनुकम्प्यः अहं प्रियः मम प्रियमिति । अहङ्कारा[देवं] मन्यते अहमिति । इदमुच्यतेऽज्ञानम् । इदमज्ञानं स्वशरीरं बध्नाति । तेन मनुष्यदेवतिर्यक्षु वर्तते । बन्धस्त्रिविधः (१) प्रकृतिबन्धः (२) विकृतिबन्धः (३) दक्षिणाबन्ध इति । एते त्रयः पश्चाद्द्रक्ष्यन्ते । अत उक्तं निमित्तनैमित्तिकेति । धर्मो निमित्तमाख्यायते । ऊर्ध्वगमनं नैमित्तिकम् । अधर्मो निमित्तम् । अधो गमनं नैमित्तिकम् । ज्ञानोद्वेगौ निमित्तम् । अपवर्गो नैमित्तिकः । अज्ञानोद्वेगौ निमित्तम् । बन्धो नैमित्तिकः । [इति] चत्वारि निमित्तानि चत्वारि नैमित्तिकानि उक्तानि ॥ ४४ ॥

किञ्च चत्वारि निमित्तानि चत्वारि नैमित्तिकानि सन्ति । [तान्य] धुना वक्ष्यति ।

वैराग्यात्प्रकृतिलयः संसारो राजसाद्भवति रागात् ।
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ॥ ४५ ॥

Ch: वैराग्यात्प्रकृतिलयः राजसाद्रागात्संसारः ।
ऐश्वर्यादविघातः तद्विपर्ययाद्विघातोऽस्ति ॥

वैराग्यात्प्रकृतिलय इति । [यथा]कश्चिद्ब्राह्मण :प्रव्रजितो मार्गमधीयान एका-दशेन्द्रियाणि निगृह्णाति । एकादशविषयान् दूरतः परिहरति । यमनियमादिदश[2]धर्मान् संरक्षति । तदा उद्वेगं लभते । उद्वेगाद्वैराग्यम् । पञ्चविंशतितत्त्वज्ञानं तु नास्ति । तस्मान्नास्त्यपवर्गः । अयं म्रियमाणः केवलमष्टसु प्रकृतिषु लीयते । अष्ट प्रकृतयो यदुत प्रकृतिर्बुद्धिरहङ्कारः पञ्चतन्मात्राणि । अष्टसु प्रकृतिषु स्थितः अनवाप्तमोक्षो मुक्त इति मन्यते । पश्चात्संसरणकाले त्रिषु लोकेषु स्थूलशरीरं पुनरुपादत्ते । अत उक्तं

1. See p. 57, n. 3.
2. Thee eds. read ज्ञान

वैराग्यात्प्रकृतिलय इति । अयमुच्यते प्रकृतिबन्ध[1]इति । राजसाद्रागात्संसार इति । राजसो राग इति । यथा कश्चिन्मन्यते । अहं महादानमाचरामि, महायज्ञं देवकार्यं करोमि, सोमरसं पिबामि, परलो[2]के सुखमनुभविष्यामि इति । अनेन राजसरागेण ब्रह्मस्थानादितिर्यग्जातिपर्यन्ते संसारे जन्मोपादत्ते । अयमुच्यते दक्षिणाबन्ध इति । ऐश्वर्यादविघात इति । ऐश्वर्यं सत्त्वजातीय[1256, c. 2]मष्टाङ्गमणिमलघिमादि । अनेनैश्वर्येण ब्रह्मादिस्थानं यत्राष्टविधाविघातो भवति । इमान्यष्टैश्वर्याणि बुद्ध्या संयोगाद् विकृति[3]बन्ध इत्युच्यन्ते । तद्विपर्ययाद्विघातोऽस्ति इति । यदैश्वर्यविपरीतं तदनैश्वर्यम् । अनैश्वर्येण सर्वत्र विघातः । अयं विघातोऽपि विकृतिबन्धः । अस्य तामसधर्मत्वात् । इत्यस्यामार्यायां चत्वारि निमित्तनैमित्तिकान्युक्तानि । वैराग्यं निमित्तम् । प्रकृतिलयो नैमित्तिकः । राजसरागो निमित्तम् । संसारो नैमित्तिकः । एश्वर्यं निमित्तम् । अविघातो नैमित्तिकः । अनैश्वर्यं निमित्तम् । विघातो नैमित्तिकः । एवमष्टनिमित्तानि अष्टनैमित्तिकानि इतीमे षोडशसर्गा उक्ताः ॥ ४५ ॥

पर आह । इमे षोडशनिमित्तनैमित्तिकसर्गाः किमात्मकाः । आर्ययोत्तरमाह ।

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्याः ।
गुण[4]वैषम्यविमर्देन तस्य भेदास्तु पञ्चाशत् ॥ ४६ ॥

Ch. सर्गो बुद्धिनिमित्तात्मकः, विपर्ययाशक्तितुष्टिसिद्धयः ।
गुणवैषम्यविमर्शेन बुद्धिसर्गस्य पञ्चाशद्भेदाः ॥

1. प्रकृतिबन्धो नाम अष्टसु प्रकृतिषु परत्वेनाभिमानः—MV. ad. k. 44. प्रकृतावात्मज्ञानात् ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः—STK. ad. k. 44.
2. Three eds. read बुद्धलोक
3. वैकारिकबन्धो नाम ब्रह्मादिस्थानेषु श्रेयोबुद्धिः—MV. ad. k. 44. ऐश्वर्यादिनिमित्तो भोगो वैकारिक इत्युच्यते—MV. ad. k. 45. वैकारिकबन्धस्तेषां ये विकारानेव भूतेन्द्रियाहङ्कारबुद्धीः पुरुषधिया उपासते—STK. ad. k. 44.
4. STK. and Candrikā read गुणवैषम्यविमर्दात्तस्य च etc. Takakusu suggests that according to Paramārtha, the reading—*guṇa vaiṣamya vimars'a*—may be supposed.

सर्गो बुद्धिनिमित्तात्मक इति । सर्ग इति षोडशको वा अष्टविधानि नैमित्तिकानि वा । यदि षोडशविधः, [तदा] अष्ट निमित्तानि अष्ट नैमित्तिकानि च बुद्ध्यात्मकानि । अष्टविधानि वा [इति पक्षे] अष्ट नैमित्तिकानि सर्गाख्यानि । अष्ट निमित्तानि तदा[1]त्मकानि । अत उक्तं षोडशविधः सर्गो बुद्धिनिमित्तात्मक इति । यथा प्रागार्योक्ता । अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् । सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ इति । विपर्ययाशक्तितुष्टिसिद्धय इति । ते षोडशसर्गभेदाश्चतुर्धा भिन्नाः (१) विपर्यय (२) अशक्ति (३) तुष्टि (४) सिद्धय इति । यथा[2] कश्चिद्ब्राह्मणश्चतुर्भिः शिष्यैः सह महतो राष्ट्रपा[3]लात् स्वधाम प्रतिनिवर्तते । पथि गच्छन्[4] सूर्येऽनुदिते तच्छिष्यः कश्चित्तदावोचदाचार्यम् । आचार्य मार्गमध्ये यत्किञ्चिद्वस्तु पश्यामि । न जाने अयं स्थाणु र्वा पुरुषो वा इति । [एवं] अस्य शिष्यस्य स्थाणौ संशयोऽजायत । आचार्यो द्वितीयं शिष्यमवोचत् । गत्वा विमृश्य विलोकय पुरुषो वा स्थाणु र्वा इति । अयमाचार्यवचनेन ततो दूरादेव व्यलोकयत् । न तत्समीपं गन्तुं समर्थोऽभूत् । तदा अवददाचार्यम् । अचार्य तत्समीपं गन्तुं न शक्नोमि इति । अस्य द्वितीयपुरुषस्याशक्तिः । अथावोचत्तृतीयं शिष्यम् । त्वं प्रकामं विलोकय निश्चिनुहि किमेतद् इति । विलोक्याचार्यमवोचत् । आचार्य[5] किं प्रयोजनमेतद्व्यवलोकनेन । सूर्ये उदिते महान् सार्थवाहः प्रादुर्भवेत् । अनुसरामः इति अस्य तृतीयपुरुषस्य स्थाणुपुरुषाविवेके[6]ऽपि तुष्टि र्जाता । अथावोचच्चतुर्थं शिष्यम् । त्वं गत्वा विलोकय इति । अयं विशुद्धचक्षुरिन्द्रियत्वाद् वेलरज्जुवलयमपश्यत् । ऊर्ध्वञ्च शकुनिसमवायोऽसीत् । गत्वा [1256, c. 3] तन्मूलं पस्पर्श । प्रतिनिवृत्याचार्यमब्रवीत् आचार्य अयं स्थाणुः [इति] । अयं चतुर्थः पुरुषो हि सिद्धिमलभत । तस्मात् षोडशसर्गभेदाश्चतुर्धा भिन्नाः । गुणवैषम्यविमर्शेनेति । गुणास्त्रिविधाः सत्त्वं रजस्तम इति । इमे त्रयोऽन्योन्यं विरुद्धाः । सत्त्वमुत्कटञ्चेद्

1. lit. तस्य or तेषां शरीराणि
2. This illustration lacks in MV. GB.
3. Three eds. read राष्ट्र·
4. lit. मार्गमध्यस्य.
5. Ming ed. omits आचार्य·
6. So Three eds. Other eds.: अविभाग.

रजस्तमसी अभिभवति । यथा सूर्यतेजो नक्षत्रवह्न्यादिकमभिभवति । रजस्युत्कटेऽप्येवम् । यदि विमृश्यते त्रिगुणवैषम्यादि, [तदा] बुद्धिसर्गाः पञ्चाशद्भिन्नाः ॥ ४६ ॥

पञ्चाशद्भेदानिदानीं वक्ष्यति ।

पञ्च विपर्ययभेदा भवन्त्यश[1]क्तिश्च करणवैकल्यात् ।
अष्टाविंशतिभेदा, तुष्टि नवधाष्टधा सिद्धिः ॥ ४७ ॥

Ch: विपर्ययस्य पञ्च भेदा भवन्ति अशक्तेरष्टाविंशतिः ।
करणवैकल्यात्, तुष्टेर्नव सिद्धेरष्टभेदाः ॥

विपर्यस्य पञ्च भेदा भवन्तीति । विपर्ययः पूर्वमुक्तः । अधुना पञ्च भेदा उच्यन्ते । (१) तमः (२) मोहः (३) महामोहः (४) तामिस्रः (५) अन्धतामिस्र इति ॥ ४७ ॥

अधुनाशक्तिमनुक्त्वा पूर्वं पञ्चविपर्ययभेदान् प्रकाशयति ।

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४८ ॥

Ch: उक्तास्तमसोऽष्टभेदा मोहस्याष्टौ महामोहस्य दश ।
तामिस्रस्याष्टादश अन्धतामिस्रस्यापि तथा ॥

उक्तास्तमसोऽष्टभेदा इति । यदि पुरुषोऽज्ञानेन [2]विरक्तः, प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्राख्येषु अष्टसु प्रकृतिषु लीयते । अयं पुरुषोऽलब्धमोक्षो[ऽपि] लब्ध[3]मतिं करोति । अष्टविधबन्धादर्शित्वात् । अत उच्यते अष्टविधा दृष्टिस्तम इति । अविद्यायास्तम[4] इति नामान्तरम् । मोहस्याष्टाविति । अष्टविधमैश्वर्यं

1. GB. reads अशक्तेः.
2. Three eds: रक्त.
3. So Three eds. Other eds. लब्धक्षण
4. cf. STK. अविद्यास्मितारागद्वेषाभिनिवेशा यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञकाः पञ्चविपर्ययविशेषाः ad. k. 47.

प्रागुक्तम् । तत्रोत्पन्नरागबन्धा देवादयो मोक्षं न लभन्ते । ऐश्वर्यासङ्गेन संसारे संसरणाद् उक्तो मोहस्याष्टविधभेदः । अष्टावाद्याः प्रकृतिबन्ध इत्याख्यायन्ते । अष्टावन्तिमा विकृतिबन्ध इत्याख्यायन्ते । महामोहस्य दशेति । पञ्चतन्मात्राणि सत्त्वलक्षणानि देवानां विषयाः । इमे पञ्च विषयाः पञ्चमहाभूतैः संयुक्ताः त्रिगुणलक्षणा [भवन्ति] । एषु दशविषयेषु ब्रह्ममनुष्यतिर्यगादय एतान् विहाय बहिरन्यो विशिष्टविषयो नास्ति इत्युत्पन्नरागबन्धाः । तदासङ्गेन सामान्यतो ज्ञानमोक्षधर्मरहिता विषयासक्ता न मोक्षं प्रार्थयन्ते । अतो महामोह इति नाम । तामिस्रस्याष्टादशेति । अष्टविधैश्वर्ये दशविधविषये च निवर्तमाने दरिद्र इमां चिन्तां करोति । दरिद्रोऽस्मि, ऐश्वर्यं विषयाः सर्वेऽपि क्षीणा इति । इमां वृत्तिं संकल्पयतोऽष्टादशदुःखान्युद्भवन्ति । इमानि दुःखानि तामि[1]स्र इत्याख्यायन्ते । अन्धतामिस्रस्यापि अष्टादशेति । यथा प्रागुक्तमष्टविधमैश्वर्यं दशविधो विषय इति । एभिरष्टादशभिः संपन्नो मनुष्यो मरणसमय एवं चिन्तां करोति । अहमष्टविधमैश्वर्यं दश[1257] विषयांश्च त्यजामि । नरकपाला मां बध्वा यमराजभवनं नयेयुरिति । अनया चिन्तया संजातदुःखः, न च साङ्ख्यमतं श्रोतुं समर्थः । अतोऽन्धतामिस्र[2] इत्याख्या [दुःखस्यास्य] । एवं तम [आदि] पञ्चभेदानां द्विषष्टिभेदा भवन्ति ॥ ४८ ॥

अधुनाशक्तिभेदानाह ।

एकादशेन्द्रियवधा सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदश वधा बुद्धे विंपर्ययात्तुष्टिसिद्धीनाम् ॥ ४९ ॥

Ch: एकादशेन्द्रियवधा बुद्धिवधा अशक्तिराख्याता ।
बुद्धिवधाः सप्तदश तुष्टिसिद्धिविपर्ययात् ॥

1. STK. calls it *dveṣa*. MV. calls *krodha*,
2. STK. calls it *bhaya* and *abhiniveśa*, while MV. calls *trāsa*. GB. speaks of it *mahad duhkha*.

एकादशेन्द्रियवधा इति। बधिरत्वान्धत्वविग्रत्व[1] [जिह्वा] दुष्टत्व[2]कुष्ठत्वोन्माद-मूकत्ववक्रत्वपङ्गुत्ववन्ध्यत्वोदावर्ताः[3]। एते एकादशेन्द्रियवधाः। कथमशक्तिरित्युच्यते। श्रवणासामर्थ्याद् यावन्मोक्षं लब्धुमक्षमः। यथा बधिरः पुरुषः—अन्यैकल्याधिनापि योज्यताम्—कल्याणमित्रं वदति। अहं दुःखितः किं करवाणि इति। कल्याणमित्र आह। साङ्ख्यज्ञानं परिगृह्णीष्व, दुःख[4]क्षयं दुःखपारञ्च गत्वा मोक्षं प्राप्स्यसि इति। [स] प्रतिवदति। नाहं [सांख्यज्ञानं स्वीकर्तुमलम्। गुरुवचनं न शृणोमि इति। अश्रुत्वा [गुरु]वचनं कुतो ज्ञानमुत्पद्येत। यथा बधिरः तथा अन्धादयो[5]ऽपीन्द्रियवधान्न ज्ञानमधिगन्तुं समर्थाः। न च मोक्षमाप्तुमलम्। बुद्धिवधा अशक्तिराख्याता। बुद्धिवधाः सप्तदशेति। पश्चाद्वक्ष्यते।

सुवर्णसप्ततिशास्त्रे मध्यमखण्डः।

---

1. 'Wêng' lit. means a big earthern jar without spout. It seems that the character is used metaphorically to indicate *vigratva*; because the head of a person without nose would appear something like *ghaṭa*, a jar without spout. But H. Ui suggests here a Chinese Character as an alternative reading which would mean *ghrāṇavadha* for *vigrttva*.

2. Three eds. omit कुष्ठत्व.

3. MV. gives the following 11 defects of organs: आन्ध्य बाधिर्य, घ्राणपाक, जडत्व, कुष्ठत्व, मूकत्व, कुणित्व, पङ्गुत्व, गुदावर्त (Read उदावर्त), क्लैब्य, उन्मादाः. GB. gives the same in different order, adding प्रसुप्ति and उपजिह्विक and omitting जडत्व and कुष्ठत्व. STK. cites a verse:

बाधिर्यं कुष्ठितान्धत्वं जडताजिघ्रता तथा। मूकता कौण्यपङ्गुत्वे क्लैब्योदावर्तमन्दताः॥

Jaya also cites a verse:

बाधिर्यमान्ध्याघ्रातृत्वे मूकता जडता तथा।
उन्मादकौण्यकुष्ठानि क्लैब्योदावर्तपङ्गुताः॥

4. Three eds. अत्यन्तं दुःखपारं गत्वा, etc.

5. Ibid. अपि omitted.

अथ सुवर्णसप्ततिशास्त्रे ऽन्तिमखण्डः।

तुष्टिसिद्धिविपर्ययादिति। नवविधतुष्टीनामष्टविधसिद्धीनां विपर्ययः। एतत्सप्तदशानां विपर्ययो बुद्धिवध इत्याख्यायते। एकादशेन्द्रियवधाः सप्तदशबुद्धिवधाश्चेतीमेऽष्टाविंशति[रशक्तिभेदाः]॥ ४९॥

नव तुष्टिभेदाः कथम्? आर्यया विवृण्वन्नाह।

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्या विषयोपरमात्पञ्च नव च तुष्टयोऽभिहिताः॥ ५०॥

Ch: आध्यात्मिक्यश्चतस्रस्तुष्टयः प्रकृत्युपादानकालभाग्यानि।
बाह्यास्तुष्टयः पञ्च विषयोपरमादाहत्य नव॥

आध्यात्मिक्यश्चतस्रस्तुष्टयः प्रकृत्युपादानकालभाग्यानीति। आध्यात्मिक्य इति [याः] बुद्ध्यहङ्कारमनांस्यधिकृत्य चतस्रस्तुष्टयः प्रवर्तन्ते। (१) प्रकृत्या तुष्टिः (२) उपादानान्वेषणया तुष्टिः (३) कालेन तुष्टिः (४) भाग्यलाभेन तुष्टिश्चेति। चतसृणां तुष्टीनां प्रदर्शनाय एवं दृष्टान्तः क्रियते। यथा[1] ब्राह्मणा गृहं त्यक्त्वा प्रव्रजिताः। [तत्रैकं] कश्चित्पुरुषः पृच्छति। किं बुद्ध्वा [1257, c. 2] प्रव्रजितोऽसि इति। अयं प्रतिवदति। जानाम्येषां त्रयाणां लोकानां प्रधानं तथ्यं कारणम्। अतः प्रव्रजितोऽस्मि इति। स ब्राह्मणः केवलं जानाति प्रधानं कारणमिति। न जानाति नित्यमनित्यं वा सचेतनमचेतनं वा सगुणं निर्गुणं वा व्याप्यव्यापि वा इति। किन्तु जानाति अस्तीति कारणञ्चेति। अतस्तुष्टि र्जायते। स न भवति मुक्तः। इयं तुष्टिः प्रकृत्या जाता। अथ द्वितीयं ब्राह्मणं पृच्छति। किं ज्ञात्वा प्रव्रजितोऽसीति। स प्रतिवदति। अहं विजानामि प्रधानं लोककारणमिति। मोक्षकारणमुपादानमिति च ज्ञातवानस्मि। प्रधानं तथ्यं कारणमिति [ज्ञाने] सत्य[2]पि यद्युपादानं नास्ति। मोक्षो न सिध्यति। तस्मादुपादानं स्वीकरोमि। उपा[3]दानं

---

1. MV. and GB. have this and the following illustrations but not in the form of dialogue.

2. Three eds. read 'shui' (who) for 'sui' (although).

3. MV. gives the following four *upādānas*: त्रिदण्ड, कुण्डिका, अक्षमाला, कृष्णाजिन. GB. त्रिदण्ड, कमण्डलु, विविदिषा. STK. उपादान = प्रव्रज्या.

सर्वप्रव्रजितानुष्ठानपद्धत्युपकरणम् । [तच्च] उपकरणं चतुर्विधम् । त्रिदण्डकुण्डिकाकषायमङ्गलानि । (१) भस्मकोशिका[1] (२) रुद्रा[2]क्षमणिः (३) त्रितन्तुवेष्टितकायत्वं (४) मन्त्रपठनं (५) जटाग्रे कुशवल्लीस्थापन[3]मिति । एतानि पञ्च शिक्षाचर्योपकरणानि अशुद्धिमपनयन्तीति मङ्गलमित्युच्यन्ते । प्राक् सिद्धैः त्रिभिः सहाष्टोपकरणानि । एभ्यो मोक्षं लप्स्ये इत्यनेन प्रव्रजितोऽहमिति । तस्माद्द्वितीया तुष्टिरुपादानाख्या । अनया तुष्ट्या न मोक्षं लभते । केवलं जानाति प्रधानं कारणमिति । नाधिकम् । अथ तृतीयं ब्राह्मणं पृच्छति । किं ज्ञात्वा प्रव्रजितोऽसीति । स प्रत्याह । प्रधानं चत्वार्युपादानानि किं कर्तुं समर्थानि । जानामि [4]उपादानं विनापि [कालेन] मोक्षं लप्स्ये इति प्रव्रज्यामिच्छामि । इति । अयं तृतीयो न मुक्तो भवति । कस्मात् । पञ्चविंशतिपदार्थाज्ञानात् । इयं तृतीया तुष्टिः कालतुष्ट्याख्या । अथ पृच्छति चतुर्थं ब्राह्मणं । किं ज्ञात्वा प्रव्रजितोऽसीति । स प्रत्याह । प्रधानमुपादानं कालो वा किं कर्तुं समर्थः । यदि भाग्यलाभहीनः । अहं ज्ञातवान् भाग्यला[5]भात् मोक्षं लप्स्य इति । अतः प्रव्रजितोऽस्मि । इति । अयं चतुर्थोऽपि न मुच्यते । ज्ञानाभावात् । इयं चतुर्थी तुष्टिर्भाग्यलाभतुष्ट्याख्या । एताश्चतस्रस्तुष्टयो नैमित्तिकाः सिद्धाः । बाह्यास्तुष्टयः पञ्चविषयोपरमादाहत्य नवेति । बाह्यास्तुष्टयः पञ्चविधा भवन्ति । पञ्चविषयाणां दूरत उपरमात् [अ[6]र्जनरक्षणक्षयातृप्तिहिंसादोषान् दृष्ट्वा] । यथा एकः पुरुषः पञ्च ब्राह्मणपरिव्राजकान् दृष्ट्वा क्रमेणोपगम्य पृच्छति । आदौ प्रथमं ब्राह्मणं पृच्छति । किं ज्ञात्वा प्रव्रजितोऽसीति । स प्रत्याह । लोके पञ्च विषयाः सन्ति । तद्विषयार्जनार्थं वृत्तयः—यदि वा कृ[7]षिः

1. ie. a bag.

2. lit. दिव्याक्षमणि

3. lit. कुशाख्यदीर्घवल्ल्या जटाग्रे स्थापनम् .

4. Three eds. जानामि, न पुनर्मोक्षं प्राप्यन्ति etc.

5. Ibid. लाभ omitted.

6. MV. has the same *doṣas*. GB. and Jaya read *sanga* for *atṛpti*. STK. reads *bhoga* for it.

7. lit. क्षेत्रकर्म

यदि वा पाशुपाल्यं यदि वा राजसेवा यदि वा वाणिज्यम्[1]—सर्वा[स्ता] दुष्कराः । ताश्चतस्रो वृत्तीर्विहाय यदि वा चौर्यं क्रियताम् । इयं [अपि] विषयार्जनवृत्तिर्नियमेन दुष्करा । स्वपरपीडनात् । [1257, c. 3] एता वृत्ती [दुष्करा] दृष्ट्वा प्रव्रज्यामिच्छामि । अयं पञ्चमो ब्राह्मणो न मुक्तो भवति । अतत्त्वज्ञत्वात् । अथ द्वितीयं ब्राह्मणं पृच्छति । किं ज्ञात्वा प्रव्रजितोऽसीति । स प्रत्याह । अहं जानामि पञ्चविषया अन्वेषणेन लभ्यन्ते पूर्ववत्कृष्याद्युपायैः । विषयान् लब्[2]ध्वा रक्षणं दुष्करम् । कस्मात् । पञ्चगृ[3]हचर्या[मिथो] विरुद्धाः । विषयरक्षणेनात्मा परश्चोपहन्यते । रक्षणदुःखदर्शित्वात् विषयोपरतः प्रव्रजितोऽहमिति । अस्य षष्ठस्यापि न मोक्षोऽस्ति । अतत्त्वज्ञत्वात् । अथ तृतीयं पृच्छति । किं ज्ञात्वा प्रव्रजितोऽसीति । स प्रत्याह । अहमलब्धमन्वेष्टुमार्जयितुञ्च क्षमः । आर्जयित्वा रक्षामि अक्षयाय । इमे पञ्च विषयाः स्वोपभोगात् स्वभावतः क्षीयन्ते । क्षयकाले महद्दुःखमुत्पद्यते । एषां क्षीणविषयाणामवद्यदर्शित्वात्प्रव्रज्यामिच्छामि । इति । अय[4]मपि न मोक्षं लभते । अतत्त्वज्ञत्वात् । अथ चतुर्थं पृच्छति । किं ज्ञात्वा प्रव्रजितोऽसीति । स प्रत्याह । अहमलब्धमन्वेष्टुं शक्त आ[5]र्जयामि । अर्जयित्वा च रक्षामि । क्षीणेऽपि पुनरार्जयामि । तथा चेत् कुतः प्रव्रजितः । पञ्चेन्द्रियाणि न तृप्तानि । उत्तरोत्तरमुत्कृष्टान्वेषित्वात् । एषामिन्द्रि[6]याणां दोषं पश्यामि । अतः प्रव्रज्यामिच्छामि । इति । अस्याष्टमस्यापि न मोक्षोऽस्ति । अतत्त्वज्ञत्वात् । अथ पञ्चमं पृच्छति । किं ज्ञात्वा प्रव्रजितोऽसीति ।

1. कृषिपाशुपाल्यादि—MV. पाशुपाल्यवाणिज्यप्रतिग्रहसेवाः—GB. सेवादयः—STK.

2. Three eds. omit लभ्.

3. *Chia-chü*=furniture. Takakusu has translated these characters 'occupation'. The first character generally means 'a house,' home.' and the second one 'utensil' appliance,' etc. and sometimes it has the meaning 'to prepare', 'to do' etc. Taking it here as a verbal nown I.have rendered the phrase गृहचर्या.

4. Three eds. add सप्तमः

5. So Three eds. Other eds. omit अर्जयामि

6. Three eds. सात्त्विकेन्द्रिय.

स प्रत्याह । अहमलब्धलाभायान्वेष्टुं क्षमः लब्ध्वा रक्षाम्यक्षयाय । उपभुज्य पुनरार्जयितुञ्च क्षमः । यद्युत्कृष्टमिच्छामि । अहं [त]दपि लब्धुं क्षमः । तथा चेत्कुतः प्रव्रजितः । विषय[ार्जन] वृत्तिचतुष्टयेनान्यो हिंस्यते । यदि हिंसको न [भवामि] इयं वृत्तिर्न सिद्ध्यति । कृषिकृच्चेत् तृणानि वृक्षान् छिन्द्याम् । योद्धा चेत्, तदाजनान् हन्याम् । यदि वान्यधनापहर्ता । तदान्यान् वध्याम् । यदिवा [वणिक्] स्ववाचा मिथ्या ब्रूयाम् । इति सर्वे दोषा लोके विषयेण सहोद्यन्ति । अहमेतद्दोषं ज्ञात्वा प्रव्रज्यामिच्छामि । इति । अस्य नवमस्यापि न भवति मोक्षः । बाह्य-[विषयो] द्वेगात्तत्त्वज्ञानानभ्यासात् । अत उच्यते प्रथममाध्यात्मिक्यश्चतस्रः ततः पञ्च बाह्या इत्याहृत्य नव तुष्टय इति । आसां नवानां तुष्टीनां महर्षिणा नव नामानि स्थापितानि । विषयमलशोधकत्वात् नव तुष्टयः सलिलाख्यया उच्यन्ते । (१) अम्भः (२) सलिलम् (३) ओघः (४) वृष्टिः (५) तारम् (६) सुतारम् (७) सुनेत्रम् (८) सुमरीचम् (९) उत्तमाम्भसिक[1]मिति । एतन्नवतुष्टिविपरीता नवाशक्तय आख्यायन्ते यत् अनम्भः यावदनुत्तमाम्भसिकमिति ॥ ५० ॥

पर आह । इमे त्रयो धर्माः सिद्ध्या सह विरुद्धाः । को[1258] धर्मः सिद्धिरित्याख्यायते । आर्ययोत्तरमाह ।

ऊहः शब्दोऽध्ययनं दुखविघातत्रयं सुहृत्प्राप्तिः ।
दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ ५१ ॥

Ch: ऊहः श्रवणमध्ययनं दुःखविघातत्रयं सुहृत्प्राप्तिः ।
दाननिमित्तं सिद्धयोऽष्टौ पूर्वे त्रयः सिद्धेरङ्कुशाः ॥

ऊहःश्रवणमध्ययनं....दाननिमित्तं सिद्धयोऽष्टाविति । आभिरष्टविधशक्तिभिः षड्गतयः सिद्ध्यन्ति । यथा कश्चिद्ब्राह्मणः प्रव्रजितः मार्गमधीयान इमां चिन्तां करोति । का वृत्तिरुत्तमा । किं वस्तु सत्यम् । किमत्यन्तं पार्यन्तिकम् । किं कृत्वा ज्ञानं भवति । प्रकाशिनीं सिद्धिञ्च लभते । इत्येवं कृतोहः ज्ञानं लभते । प्रधानं

1. For the explanation of these terms given by Fujü, a Japanese commentator, v. Takak's note BEFEO. Vol. IV. p. 1038. and S. S. Sastri's Eng. tran. p. 62.

भिन्नं बुद्धिर्भिन्ना, अहङ्कारो भिन्नः, पञ्चतन्मात्राणि भिन्नानि, एकादशेन्द्रियाणि भिन्नानि, पञ्चमहाभूतानि भिन्नानि, परमात्मा[1] भिन्न[इति] । पञ्चविंशतितत्त्वेषु ज्ञानमुदेति । अनेन ज्ञानेन षड्विधान्यवलोक[2]नान्युद्भवन्ति । (१) पञ्चमहाभूतेषु दोषमवलोकयति । दोषं[3] दृष्ट्वा उद्वेग उत्पद्यते । तदा पञ्चमहाभूतानि त्यजति । [इद] मूहपदमाख्यायते । (२) एकादशेन्द्रियेषु दोषमवलोकयति । दोषं दृष्ट्वा उद्वेग उत्पद्यते । तदैकादशेन्द्रियाणि त्यजति । इदं [4]धृतिपदमित्याख्यायते । (३) एतज्ज्ञानविनियोगेन पञ्चतन्मात्रेषु दोषमवलोकयति । दोषं दृष्ट्वा उद्वेग उत्पद्यते । तदा तन्मात्राणि त्यजति । [इद]मुपगतस[5]मपदमित्याख्यायते । (४) अहङ्कारेऽष्टैश्वर्येषु च दोषमवलोकयति । दोषं दृष्ट्वा उद्वेग उत्पद्यते । तदा अहङ्कारादींस्त्यजति । [इदं] [6]प्राप्तिपदमित्याख्यायते । (५) बुद्धौ दोषमवलोकयति । दोषं दृष्ट्वा उद्वेग उत्पद्यते । बुद्धित्यागं लभते । [इदं] निवृ[7]त्तिपदमित्याख्यायते । (६) प्रधाने दोषमवलोकयति । दोषं दृष्ट्वा उद्वेग उत्पद्यते । तदा प्रधानं त्यजति । एतत्कैवल्य[8]पदमित्युच्यते । स ब्राह्मणोऽनेनोहेन मोक्षं लभते । इयं सिद्धिरूहेन लब्धत्वाद् ऊहसिद्धिरित्याख्यायते । ऊह[9]सिद्धिरुक्ता । अथ

1. *Ching-E*
2. No traces of these six contemplations are found in any other commentary.
3. Three eds omit दोष.
4. '*ch'ih*' 'to hold' धृति
5. '*ju-ju*' उपगतसम ?
6. '*chi*' 'to arrive' प्राप्ति
7. '*so*' 'to withdraw' निवृत्ति
8. '*tu-t's un*' = कैवल्य.
9. MV. says that the true knowledge is obtained either by reasoning oneself or by resorting to a teacher or by studying of a Sāṅkhya canon and not otherwise. To demonstrate this point MV. cites an illustration: Suppose some dacoits, committing dacoity in a village walk away. The owner of the property pursues and captures them together with an innocent person who accidently got into their company. A passer-by

श्रवणसिद्धिः कथ्यते । यथा कश्चिद्ब्राह्मणः शब्दमधीयानमन्यं शृणोति । यत्प्रधानं भिन्नं बुद्धिर्भिन्ना यावत्परमात्मा भिन्न इति । इममध्ययनशब्दं शृण्वन् पञ्चविंशतिपदार्थान् बुद्धवान् । तदा ऊहपदं प्रविष्टः पञ्चभूतानि त्यजति । धृति[1]पदं प्रविष्ट एकादशेन्द्रियाणि त्यजति । उपगतसमपदं प्रविष्टः पञ्च तन्मात्राणि त्यजति । प्राप्तिपदं प्रविष्टः अहङ्कारादींस्त्यजति । निवृत्तिपदं प्रविष्टो बुद्धिं त्यजति । कैवल्यपदं प्रविष्टः प्रधानं त्यजति । अयं मोक्ष आख्यायते । श्रवणसिद्धिरुक्ता । अथाध्ययनसिद्धिः[2] । अष्ट बुद्ध्यङ्गा[3]नि सिद्धिप्रापकाणि सन्ति । यथा कश्चिद्ब्राह्मणो गुरुकुलं गच्छति । (१) प्रीत्या शुश्रूषते । (२) सश्रद्धं तत्त्वं शृणोति । (३) गृह्णाति । (४) स्मृत्वा धारयति । (५) पदार्थान् जानाति । (६) ऊहते । (७) अपोहति । (८) यथाभूतमभिनिविशते । इमान्यष्ट बुद्ध्यङ्गानीत्युच्यन्ते । एभिर्बुद्ध्यङ्गैः पञ्चविंशतितत्त्वान्युपलभते । षड् गतीः प्रविश्य मोक्षं लभते । [अथ] दुःखविघातत्रयसिद्धिः । (१) आभ्यन्तरदुःखविघातः । यथा कश्चिद्ब्राह्मण आभ्यन्तरदुःखेन शिरोव्याध्यादिनाभिहतो वैद्यं गत्वा लब्धव्या[4]ध्युपशमो [भवति] । [1258, c. 2] अनेनाभ्यन्तरदुःखेन जिज्ञासा उदेति । एतद्दुःखनिमित्तनिरोधज्ञानान्वेषणार्थं सिद्धगुरुकुलं व्रजति । अष्टसु बुद्ध्यङ्गेषु प्रवर्तते । पञ्चविंशतितत्त्वान्युपलभते । षड्गत्यवलोकनप्रवेशान्मोक्षं लभते । इयं सिद्धिराभ्यन्तरदुःखेन भवति । यथा शारीरं दुःखम् । तथा मानसं दुःखमपि । (२) बाह्यदुःखविघातः । यथा कश्चिद्ब्राह्मणो बाह्यदुःखेनाभिहतो भवति । यदुत मर्त्यपशुपक्षिणां [1]वृक्षशिलादिपर्यन्तानामभिघातदुःखम् । [तत्] क्षन्तुमशक्नुवन् दुःखनिमित्तनिरोधजिज्ञासायां प्रवर्तते । गुरुकुलं गच्छति । अष्टबुद्ध्यङ्गान्यभ्यस्यति । पञ्चविंशतितत्त्वान्युपलभते । षड्गत्यवलोकनप्रवेशान्मोक्षमाप्नोति । इयं सिद्धिर्बाह्यदुःखेन लभ्यते । (३) आधिदैविकदुःख[विघातः] । यथा कश्चिद्ब्राह्मण आधिदैविकेन दुःखेन शीतातपवर्षादिनाभिहतो भवति । तत्सोढुमशक्नुवन् गुरुं व्रजति । अष्टबुद्ध्यङ्गानि प्रार्थयते । पञ्चविंशतितत्त्वान्युपलभते । षड्गत्यवलोकनानि प्रविशति । अतो मोक्षं लभते[2] । (७) सुहृत्प्राप्तिरिति । अष्टभिर्बुद्ध्यङ्गैरप्राप्तं ज्ञानं केवलं कल्याणमित्रात्प्राप्नोति । प्राप्ते पार्यन्तिके ज्ञाने मोक्षं लभते । (८) दाननिमित्तसिद्धिः । यथा[3] कश्चिद्ब्राह्मणो जनद्विष्टो जानात्यन्यं द्विषन्तम् । तस्मात्प्रव्रजति । प्रव्रजितमाचार्यः सतीर्थ्या अपि द्विषन्ति । न ज्ञानं ददति । स्वयं ज्ञात्वा [स्व]ल्प-

---

who is observing the matter brings to the notice of the owner the persons who are guilty and him who is innocent. In the same way, one gets true knowledge. The intellect, other organs and gross elements are comparable to the dacoits, the innocent to Puruṣa, the owner to a pupil and the passer-by to a preceptor.

1. Read '*ch'ih*' 'धृति' for '*nêng*' (शक्ति) (Takak).

2. तृतीयाध्ययनसिद्धिः सांख्यज्ञानमधीत्य सञ्जाता MV. वेदादिशास्त्राध्ययनात् पञ्चविंशतितत्त्वज्ञानं प्राप्यत इत्येषा तृतीया सिद्धिः — GB.

3. These eight preliminaries to the knowledge are not found in the other commentaries; see additional notes.

4. Three eds. वेदनोपशम

1. Id. adds पर्वत, etc.

2. MV. explains *duḥkhavighātatrayasiddhi* thus: A man being inflicted upon by three-fold suffering, resorts, as remedy of it, to either reasoning oneself, or hearing of others studying or a self-study, and obtains true knowledge. It seems, therefore, that according to MV. the sidhis called *duḥkhavighāta* are three, not because of three-fold suffering, as CHC. and GB. understand the term, but because of the tree-fold means of knowledge, reasoning oneself (*ūha*), hearing of other's studying (*śabda*) and self-study (*adhyayana*). Jaya follows MV. To a question why these three attainments (*sidhi*) are not the same as the three former ones, Jaya answers thus:

पूर्वा यास्तिस्रः ता न दुःख [विघात] हेतुकाः.

According to this interpretation three *siddhis are*:

1. दुःख विघातहेतुकोहसिद्धिः 2. … ..हेतुकशब्दसिद्धिः 3. ……हेतुकाध्ययनसिद्धिः ।

But according to CHC. and perhaps GB. also they are:

1. आभ्यन्तरदुःखविघाताद् अध्ययनसिद्धिः 2. बाह्यदुखविघाताद् अध्ययनसिद्धिः 3. आधिदैविकदुःखविघाताद् अध्ययनसिद्धिः ।

3. MV. has not these details.

भाम्यतां ग्रामान्तं गच्छति वस्तुम् । स्वयञ्च वदति अयं प्रदेशो ब्राह्मणरहितः । [अत्र] वर्षा[1]वासं वसामीति । [2]गत्वोषितो बहु लभते भिक्षाम् । स शिष्टं सुहृद्भ्यो बन्धुभ्यो गोपालाङ्गनापर्यन्तेभ्यः प्रत्यर्पयति । अस्मिन् ग्रामे सर्वेऽपि जना स्निग्धा भवन्ति । वर्षावासं परिसमीप्सो[3] जनाः सर्वेऽपि त्रिदण्डममत्रं वस्त्राण्यन्यानि च ददति । [ततः] शक्रोत्सवः[4] संनिहितः । तदा जनान् वदति । को मया सह एनमुत्सवं द्रष्टुं मम महाजनपदमागमिष्यति । यदि जिगमिषथ, [यूयं] सर्वे जना मह्यं यत्किञ्चिद्दत्वा गच्छत इति । तत्र गत्वा गुरुकुलं प्रयाति । उत्कृष्टं वस्तु समुद्धृत्याचार्यं सत्करोति । अवशिष्टानि क्रमेण सहाध्यायिभ्यः संविभजति । आचार्यः सुहृज्जनाः सर्वेऽपि स्निग्धा भवन्ति । तदा गुरुर्ज्ञानं ददाति । अनेन ज्ञानेन पार्यन्तिकं ज्ञानं प्राप्नोति । तदा मोक्षं च लभते । इयं दानलब्धा सिद्धिः । [5]आसामष्टसिद्धीनां प्राचीनैर्महर्षिभिर्नामान्तराणि स्थापितानि । (१) स्वतारसिद्धिः (२) सुतारसिद्धिः (३) तारतारसिद्धिः (४) प्रमोदतारसिद्धिः (५) प्रमुदिततारसिद्धिः । (६) मोहनतारसिद्धिः (७) रम्यकतारसिद्धिः (८) सदाप्रमुदितसिद्धिः इति । आसामष्टसिद्धीनां विपरीताश्चेत्, तदाष्टाश[6]क्तय आख्यायन्ते यदुत [7]अताराशक्तिः यावदसदाप्रमुदिताशक्तिः । एवमेकादशेन्द्रियपातादशक्तयः सप्तदशबुद्धिवधादशक्तयश्च अष्टाविंशतिरशक्तयो भवन्ति । इमे विपर्याशक्तितुष्टिसिद्धिभेदाः पञ्चाशत्पदार्था उक्ताः । पूर्वं त्रयः सिद्धेरङ्कुशा इति ।

1. *k'e-an-chü*
2. Three eds. omit गत्वा.
3. or वर्षावासाद्वसानेच्छस्य.
4. lit. मेलन or यात्रा. Śakrotsava, *v.* Lalitavistara ed. by Lefmann p. 246, 3—5.
5. All these siddhis are differently interpreted in STK. It says that only the three siddhis, attainments in suppressing the three sorts of miseries, are primary and the five others are secondary. For the detailed exposition of STK.'s views about sidhis, reader may refer to the Sāṅkhyakārikā ed. by S. S. Sastri (1935) pp. 96—98.
6. MV. and GB.: असिद्धयः
7. Three eds.: कुस्वतार.

यथा मत्तो [1258, c. 3] गजोऽङ्कुशनियन्त्रितो न यथेच्छस्वातन्त्र्यमाप्नोति । एवं पञ्चविपर्ययैरष्टाविंशत्यशक्तिभिर्नवतुष्टिभिर्नियन्त्रितो लोको न तत्त्वज्ञानमधिगच्छति । यदि तत्त्वज्ञानं जहाति तदाष्ट सिद्धयो न भवन्ति । अत उक्तं पूर्वं त्रयः सिद्धेरङ्कुशा इति । अतः विपर्ययाशक्तितुष्टीस्त्य[1]क्त्वा अष्टविधसिद्धीर्यत्नेनाभ्यस्येत् ॥ ५१ ॥

पर आह भावैरधिवासितं लिङ्गम् । अतःसंसरति संसारे इति पूर्वमुक्तम् । लिङ्गं द्विविधम् । (१) सूक्ष्मं लिङ्गम्, आदावुत्पन्नम् । (२) मातापितृजं शरीरमेकादशेन्द्रियाणि च । उभयं संयुक्तमष्टभिर्भावैरधिवासितम्, अतः संसरति संसारे । अत्र संशयः किं पूर्वमुत्पद्यते । किं लिङ्गं पूर्वम्, किं वा भावाः पूर्वमिति । आर्ययोत्तरमाह ।

न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः ।
लिङ्गाख्यो भावाख्यस्तस्माद्भवति द्विधा सर्गः[2] ॥ ५२ ॥

Ch: विना भावैर्न विभक्तं लिङ्गं विना सूक्ष्मलिङ्गेन न भावाः ।
लिङ्गाख्यो भावाख्यस्तस्मात्सर्गो द्विविधः ॥

विना भावैर्न विभक्तं लिङ्गमिति । यदि भावा न सन्ति । लिङ्गं न सिद्ध्येत् । यथौष्ण्यं विना नाग्निः सिद्ध्यति । विना [3]सूक्ष्मलिङ्गेन न भावा इति । भावा लिङ्गविरहिताश्चेत्, न सिद्ध्यन्ति । यथाग्निं विना औष्ण्यं न सिद्ध्यति । इमावुभौ धर्मौ परस्परापेक्षौ अनलौष्ण्यवत् । तौ च धर्मौ युगपदुद्भवतः यथा गोः शृङ्गद्वयम्[4] । लिङ्गाख्यो भावाख्यस्तस्मात्सर्गो द्विविध इति । प्रकृतिविकारस्य द्वे आख्ये स्तः । (१) लिङ्गाख्यः सर्गः (२) भावाख्यः सर्ग इति । संसारस्य सर्गादावेव

1. Read *hsü* for *tz'u* (Takak.).
2. GB. STK. and Candrikā read : तस्माद्द्विविधः प्रवर्तते सर्गः.
3. Three eds. omit सूक्ष्म
4. गोविषाणवत्, कुमारीस्तनवत्— MV. CHC. and MV. agree with each other in this verse.

द्वैविध्यं संपन्नम् ॥ पर आह । अस्य सर्गस्य किं द्वैविध्यमेवास्ति किं वा पुनरस्त्यन्याख्यः [सर्ग] इति । समाधीयते ॥

प्रा[1]चीनमहर्षिभिर्नामान्तराणि स्थापितानीति । (१) स्वतारमिति । अयं पुरुषोऽतिमात्नं स्वोहतीक्ष्णः केवलं प्रज्ञां लब्ध्वा मोक्षं साधयति । न परोपदेशेन । अतो वदन्ति स्वतारसिद्धिरिति । स्वोहमात्रेण लब्धा न परेण इति स्वतारम् । सैव प्रज्ञा । प्रज्ञा हि ऐहिकान्मोचयित्वा आमुष्मिकं प्रापयति । अतः पराक्रान्तकाल[2] इति व्यपदिशन्ति । तदा हि मोक्षो नाम । मोक्ष एव सिद्धिरित्याख्यायते । हेतुस्तारमुच्यते । फलं सिद्धिरुच्यते । इमां तारसिद्धिं स्वोहेन लब्धत्वात्[3] स्वतारसिद्धिरिति वदन्ति । पश्चात्सप्त तारसिद्धय अभिन्ना नामान्तरमात्रेण विषमाः । (२) सुतारसिद्धिरिति । आत्मना परेण[च] लब्धप्रज्ञो मोक्षं साधयति । अयं पुरुषः समृद्धेन्द्रियः किञ्चिदवरः परोपदेशेन[लब्ध] बहुस्वार्थो मोक्षमाप्तुं शक्नोति । अतः सुतारसिद्धिरिति व्यपदिशन्ति । (३) तारतारसिद्धिरिति । एकान्ततः परोपदेशेन लब्धत्वात्ता-[4]रेति । [अयं] समृद्धेन्द्रियः ततोऽपि अवरः । (४) प्रमोदतारसिद्धिरिति । अयं पुरुष आभ्यन्तरदुःखेन शिरोव्याध्यादिनाभिहतो गुरुं व्रजति । चिकित्सां प्रार्थयते । तात्कालिकीमाभ्यन्तरदुःखनिवृत्तिं लभते । इयमेकविधप्रमोदाय भवति । [अथ] चिन्तयति । इदं निवृत्तिमात्नं, नात्यन्तिकनिवृत्तिरिति । यदा कैवल्यं, तदा तु आत्यन्तिकनिवृत्तिरिति ज्ञानात् [1259.] सांख्याचार्यं व्रजति । प्रज्ञां शिक्षते । मोक्षसिद्धिं प्रार्थयते । परमं प्रमोदमाप्नोति । अस्मादुभयविधप्रमोद[लाभ]ात् प्रमोदतारसिद्धिरित्याख्या भवति । (५) प्रमुदिततारसिद्धिरिति । अयं पुरुष आभ्यन्तरबाह्योभयविधदुःखाभिहतः [चिकित्सा] चार्यं गत्वा दुःखद्वयस्य चिकित्सां प्रार्थयते ।

1. The portions included in this and the next para are sub-commentary explaining the terms, *svatāra*, and others referred to in the commentary *ad* 51. This sub-commentary seems to be added by Paramārtha himself.

2. ‘*to-chi-chih-shih*, पराक्रान्तकाल ?

3. Three eds. omit—त्वात्.

4. ‘*chuan*’ ‘fully’.

यतो दुःखद्वयस्य तात्कालिकी शान्तिः तदैवोभयविधप्रमोदो भवति । नेयमात्यन्तिकी निवृत्तिरिति ज्ञात्वा तारसिद्धिं शिक्षितुमाचार्यं प्रार्थयते । [सिद्धि] लाभात्प्रमोदः प्रमुदिताख्या मुपादत्ते । (६) मोहन [तारसिद्धि]रिति । अयं पुरुषः (१) आभ्यन्तरदुःखं शिरोव्याध्यादि । (२) बाह्यदुःख मसिगदादि (३) दैवदुःखं वातवर्षशीतातपादि । एतत् सर्वदुःखत्रयाभिभूतः आचार्यं गत्वा चिकित्सां प्रार्थयते । तच्चिकित्सा यतो विशिष्यते । [ततो] मोहनमिति व्यपदिश्यते । [इयं] नात्यन्तिकनिवृत्तिरिति ज्ञात्वा आचार्यमुपगम्य शिक्षाभ्यासात्तारसिद्धिं लभते । अस्मान्मोहनतारसिद्धिरित्याख्या भवति । (७) रम्यकतारसिद्धिरिति । [अयं पुरुष] आचा[1]र्यानुकम्पाप्रीतिभ्यां तां तारसिद्धिं शिक्षते । आचार्यात्तामाख्यामुपादत्ते । (८) सदाप्रमुदितसिद्धिरिति । अयं पुरुषः सर्वद्विष्टो धनवस्त्रदानं प्रतिगृह्णाति । [तानि]दत्वा सर्वेषां स्निग्धो भवति । सर्वेऽपि तस्य सिद्धिं कर्तुमभिलषन्ति । अतः सदाप्रमुदिततारसिद्धिरिति वदन्ति ॥ इन्द्रियवधादशक्तय एकादश बुद्धिवधादशक्तयःसप्तदश चाहत्याशक्तयोऽष्टाविंशतिः । पञ्चविपर्ययैर्नवतुष्टिभिरष्टसिद्धिभिः सह पञ्चाशदन्तत उक्ता इति सिद्धम् ॥ पूर्वे त्रयः सिद्धेरङ्कुशा इति पञ्चविपर्यया अष्टाविंशत्यशक्तयो नवतुष्टयश्च । इमे [पूर्वे] अन्तिमाष्ट[2]सिद्धिगजस्याङ्कुशाः । अष्टविधाः [’सिद्धयः] मोक्षं साधयितुमर्हन्ति । त्रिविधा[ङ्कुशेन] तु न शक्नुवन्ति । यथा मत्तगजः स्वातन्त्र्याहोऽङ्कुशेन न यथेच्छं स्वातन्त्र्यं प्रयाति । तथाष्टसिद्धयोऽपि । अवश्यं तत्त्वज्ञानेनाष्टसिद्धयो लभ्यन्ते । त्रिविधाङ्कुशेन तत्त्वज्ञानं न लभ्यते । अतोऽवश्यं ’पूर्वं त्रिविधं त्यक्त्वा अन्तिमाष्टसिद्धीर्यत्नेनाभ्यस्येत् ।

पर आह । अथ[3] प्रथमं पूर्वपदा[4]र्थं पश्चात् पौर्वापर्यं पृच्छामि ।

1. The term ‘*suhṛt*’ of the k. is translated into ‘*kalyāṇamitra*’ but here it is rendered *ācārya.* Hence *suhṛt*=*kalyāṇamitra*=*ācārya.* That *kalyāṇamitra* is an equivalent of *ācārya* is a familiar expression in the Buddhist literature.

2. So Three eds. Other eds: अप्रमुदितसिद्धिगजस्य. Read ‘*hsiaug*’ for ‘*chia*’ (Takak.)

3. ‘*hsia-tz‘u*’ = अथ ?

4. ‘*tieh-chien-i*’ = पूर्वपदार्थ ?

भावैरधिवासितं लिङ्गम्, अतः संसरति संसारे इति पुरस्तादुक्तम्। भावा अष्टावेव यदुत चत्वारो धर्माश्चत्वारोऽधर्माः। चत्वारो धर्माः (१) धर्मः (२) ज्ञानम् (३) विरागः (४) ऐश्वर्यञ्चेति। एषां चतुर्णां धर्माणां विपरीता एव चत्वारोऽधर्माः। [इमे]ऽष्टौ भावा इत्याख्यायन्ते। पूर्वैश्चतुर्भिः [1]धर्मैरधिवासितं देवगतिं [2]प्राप्नोति। अन्तिमैश्चतुर्भिरधर्मैरधिवासितं मर्त्यपशुगतिद्वयं प्राप्नोति। अधिवासितं लिङ्ग [मित्यत्र] लिङ्गं द्विविधम्। प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्राणि [3]सूक्ष्मलिङ्गमित्याख्यायन्ते। पञ्चतन्मात्रेभ्य उत्पन्नमेकादशेन्द्रियसंयुक्तं सत् उद्भितं स्थूललिङ्गमित्याख्यायते। एषामष्टविधभावानामधिवासितलिङ्गद्वयस्य च किं पूर्वमुत्पद्यते। किमष्टभावाः पूर्वं किं वा लिङ्ग[4]द्वयं पूर्वम् इति। समाधीयते। [अत्र]द्वे व्याख्याने स्तः। अष्टभावानां लिङ्गस्य च नास्ति पूर्वापरभावः। [1259, c. 2] अवश्यं संयुक्तानि युगपदुत्पद्यन्ते। यथाग्न्यौष्ण्ये न वियोगं लभेते। यथा वा गोः शृङ्गे द्वे ऽवश्यं युगपत्प्रादुर्भवतः। तथाष्ट भावा लिङ्गञ्च। यदा प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्र[रूप] सूक्ष्मलिङ्गमस्ति। तदावश्यमष्टसु भावेषु चतुर्विधाः सन्ति। यदि न सन्ति चत्वारो धर्माः तदा चत्वारो[ऽधर्माः] सन्ति। इति ध[5]र्माधर्माः [सूक्ष्मलिङ्गात्] नियमेन न वियोगं लभन्ते। तथा मातापितृजातं स्थूलशरीरमपि। एवं लिङ्गशरीरमपि अष्टभावेभ्यो नियमेन न वियोगं लभते॥

[6]अस्ति भौतिकाख्यस्तृतीयः सर्गः। यथाहार्या।

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।
मानुष्यकश्चैकविधः समासतो भौतिकः सर्गः॥ ५३॥

1. Three eds. भावैः
2. lit. प्रापयति
3. It is said above *ad* 40, that the subtle body is comprised of the intellect, ahaṅkāra and five fine elements. But here *pradhāna* also is included; cp. foot-note on p. 58 above.
4. Three eds. द्विविधलिङ्ग
5. Ibid. धर्म omitted.
6. The character *szu* at the beginning of this sentence in Chinese is inexplicable.

Ch: दैवगतिरष्टविकल्पा तैर्यग्गतिः पञ्चविकल्पा।
मानुष्यकगतिरेकसर्ग एव [इति] समासतो भौतिकः सर्ग उच्यते॥

दैवगतिरष्टविकल्पेति। (१) बा[1]ह्मःसर्गः (२) प्राजापत्यः सर्ग (३) ऐन्द्रः सर्गः (४) गान्धर्वः सर्गः (५) आसुरः सर्गः (६) याक्षः सर्गः (७) राक्षसः सर्ग (८) पैशाचः सर्गः इति। तैर्यग्गतिः पञ्चविकल्पेति। (१) चातुष्पादः सर्गः (२) पातगः सर्गः (३) औरगः सर्गः (४) तैर्यञ्चः सर्गः (५) स्थावरः सर्ग इति। मानुष्यकगतिरेकसर्ग एवेति। मनुष्यगतेरेकजातिमात्रत्वात्। भौ[2]तिकस्त्रिविध उक्तो यदुत देवतिर्यङ्मनुष्यत्रयलिङ्गभावास्त्रय इति॥ ५३॥

पर आह। त्रिषु लोकेषु कुत्र किमुत्कटमुपलभ्यते। आर्ययोत्तरमाह।

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः॥ ५४॥

Ch: ऊर्ध्वं सत्त्वविशालः मूलतः सर्गस्तमोविशालः।
मध्यसर्गो रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः॥

ऊर्ध्वं सत्त्वविशाल इति। ब्राह्मसर्गस्थानादौ सत्त्वमतिविशालम्। अत्रापि रजस्तमसी स्तः सत्त्वेनाभिभूते। अतो ब्रह्मादयो देवा बह्वानन्दम[3]नुभवन्ति। मूलतः सर्गस्तमोविशाल इति। यत् तिर्यक्पक्षिस्तम्बादिस्थावरसर्गपर्यन्तः। अत्र तमो विशालम्। अत्रापि रजस्सत्त्वे स्तः तमसाभिभूते। अतस्तिर्यगादयो मोहबहुलाः। मूलतः सर्ग इति। त्रिषु सर्गेषु तेषां [तिर्यगादीनां] अत्यन्त-

1. These eight creations are referred to above *ad* k. 44 as eight *sthānas* where *yāma* is mentioned for *āsura* of this place.
2. We ought to read here simply *sarga* instead of *bhautikasarga*, since *liṅga* and *bhāva* are included in *bhautikasarga*. Or omitting *liṅga* and *bhāva*, we may read: भौतिकस्त्रिविधो यदुत देवतिर्यङ्मनुष्यास्त्रय इति
3. Three eds. कामसुख.

मधमत्वान्मू[1]ल इत्युक्तम् । मध्यसर्गो रजोविशाल इति । [2]मानुषसर्गे रजो विशालम् । सत्त्वतमसी अपि स्तः । रजोबहुलत्वादभिभूतसत्त्वतमस्कत्वाच्च मनुष्येषु शोकदुःखे बहुले । मनुष्यगतेर्मध्येति नाम । तिसृषु गतिषु मध्यवर्तित्वात् । अन्तिमः सर्गः कथं स्त[1]म्ब इत्युच्यते । यदोषधिवनस्पतिपर्वतपाषाणादयः, एभिस्त्रयाणां लोकानामवष्टब्धत्वात् स्तम्बनाम्ना उच्यते । एवं लिङ्गसर्गः भावसर्गो भौतिकसर्गश्च सर्वथोक्तः । त्रिविधोऽयं सर्गः प्रधानकृत इत्यतः प्रधानकार्यमवसितम् । यदुत लोकं सृष्ट्वा मोक्षं प्राप्नोतीति ॥ ५४ ॥

पर आह । त्रिषु लोकेषु मनुष्यदेवतिर्यक्षु कः सुखं दुःखञ्चानुभवति । [125b, c. 3] किं प्रधानमनुभवति किं वा बुद्ध्यहङ्कारपञ्चतन्मात्राणि यावदेकादशेन्द्रियाणि अनुभवन्ति किं वायं पुरुषोऽनुभवति । आर्ययोत्तरमाह ।

अत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।
लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं समासेन[3] ॥ ५५ ॥

Ch: अत्र जरामरणदुःखं केवलं चेतनः पुरुषः प्राप्नोति ।
लिङ्गस्याविनिवृत्तौ; तस्मात्समासेनोक्तमिदं दुःखम् ॥

अत्र जरामरणदुःखं केवलं चेतनः पुरुषः प्राप्नोतीति । त्रिषु लोकेषु दुःखमस्ति जराकृतम् । वलितत्वक्, पलितं, श्वासमोकः, यष्ट्यवलम्बनं, बन्धुमित्रैर्लघ्वीकरणम्, एवमादिदुःखानि सर्वाणि जरानिमित्तानि । मरणदुःखमिति । [यथा] कश्चित्पुरुषः लब्धैष्टैश्वर्यो यदि वा पञ्चसूक्ष्मविषयानुपलभते । यदि वा स्थूलविषयानुपलभते । स मरणमुपगतो यमेन गृह्यते । अत्र मरणदुःखाख्यं दुःखमनुभवति । किञ्च सन्ति त्रीणि [4]दुःखान्यवान्तरकालीनानि । इमानि दुःखानि चेतनः पुरुषो-

1. This explanation is not found in MV., but in other respect it agrees with CHC.

2. Three eds. मानुषो मध्यसर्गः

3. So MV. GB. and Chinese. But Jaya and Candrikā read स्वभावेन. Chinese trans. seems to read लिङ्गस्याविनिवृत्तौ.

4. MV. has simply अन्तकाले जनितदुःखानि

ऽनुभवति । प्रधानं स्थूलशरीरञ्च नानुभवतः । अचेतनत्वात् । अत उक्तं पुरुषस्य दुःखं, न प्रधानादीनामिति । पर आह । कियत्कालं पुरुष इमानि दुःखान्यनुभवति । उत्तरमाह । लिङ्गस्याविनिवृत्तौ तस्मात्समासेनोक्तमिदं दुःखमिति । [यदा] महदादिलिङ्गं सूक्ष्मशरीरदुःखं न निवर्तते । इदं स्थूलशरीरं लोके संसरति न निवर्तते । एतादृशकालमध्ये पुरुषो दुःखमनुभवति । यदा सूक्ष्मस्थूललिङ्गं निवर्तते । तदा पुरुषो मुच्यते । यदा मुच्यते । तदा एतादृशदुःखानि नान्ततोऽनुभवति । यदा न निवर्तते सूक्ष्मस्थूललिङ्गम् । तदा न दुःखान्मोक्षमाप्नोति [पुरुषः] । तस्मात्समासेनोक्तं सूक्ष्मलिङ्गं स्थूललिङ्गञ्च दुःख[1]मिति ॥ ५५ ॥

पर आह । प्रधानकार्यमेतन्मात्रम्, किमस्त्यपरं [किञ्चित्] । आर्ययोत्तरमाह ।

इत्येष प्रकृतिकृतो महद्[2]आदिविषयभूतपर्यन्तः ।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥

प्रकृतिकार्यमेवं बुद्ध्यादि पञ्चभूतपर्यन्तम् ।
त्रिलोकी[3]पुरुषविमोक्षार्थं परार्थः स्वार्थ इवारम्भः ॥

प्रकृतिकार्यमेवं बुद्ध्यादि पञ्चभूतपर्यन्तमिति । कमर्थं प्रतिपादयतीयमार्या । अर्यासप्ततेरर्थः । तत्स्वरूपं संपन्नम् । कथमेवम् । द्विविधप्रधानकार्यस्य प्रकाशितत्वात् । (१) क्रमशो जन्ममरणे [प्रधानं] समुत्पादयति । पुरुषं त्रिलोकान्तर्वर्तिविषयैर्योजयति । क्रमिकां वृत्तिञ्च लभते । आदौ बुद्धिमुत्पादयति । बुद्धे[4]रहङ्कारम् अहङ्कारात्पञ्चतन्मात्राणि । पञ्चतन्मात्रेभ्य एकादशेन्द्रियाणि पञ्चमहाभूतानि

1. तस्माद् दुःखं समासेन, MV. takes it in a different sense, viz संक्षेपेण प्राप्नोति चेतनः पुरुषः । GB. also interprets in the same manner: संक्षेपेण त्रिषु लोकेषु जराकृतं दुःखं प्राप्नोति ।

2. So MV. But GB. STK. and Candrikā read महदादिविशेषभूत, etc. Jaya reads: महदादिभूतविषय, etc. Chinese trans. seems to read महदादिपञ्चभूत, etc.

3. lit. स्थान

4. Three eds. omit बुद्धि

चोत्पादयति । एषु [1]त्रयोविंशतिकार्येषु बुद्धिराद्या । पञ्चमहाभूतानि अन्तिमानि । (२) त्रिलोकीपुरुषविमोक्षार्थं परार्थः स्वार्थ इवारम्भ इति । देवगतौ पुरुषाणां मनुष्यतिर्यग्गतौ पुरुषाणाञ्च विमोक्षार्थं क्रमेणाष्टसिद्धीः करोति । प्रधानपुरुषयोरन्तरं दर्शयति । एतदुभयं परार्थमेव न स्वार्थम् । यथा कश्चित्पुरुषः सुहृत्कार्यं करोति न करोति [1260] स्वकार्यम् । एवं प्रधानं परकार्यमेव करोति । न स्वार्थकार्यम् ॥ ५६ ॥

पर आह । उक्तं भवता प्रधानं पुरुषकार्यं कृत्वा पुरुषाद्वियोगं लभते । इति । इदं प्रधानमचेतनम् । पुरुष एव सचेतनः । कथं चिन्तां करोति, परं विषयैर्योजयामि, त्रीन् लोकान् संसारयामि, पश्चान्मोक्षयिष्यामीति । यद्यस्तीयं चिन्ता । [तदा] असाधु यदचेतनमिति । समाधीयते । अचेतनस्य [सचेतन] पदार्थवद्योगो वियोगश्च दृष्टौ । यथाहार्या ।

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥

वत्सविवृद्धिनिमित्तमज्ञं परिणमते क्षीरं ।
पुरुषविमोक्षनिमित्तमज्ञं प्रधानमपि तथा ॥

वत्सविवृद्धिनिमित्तमज्ञं परिणमते क्षीरमिति । यथा लोके अज्ञमुदकं तृणञ्च गवा भक्षितं वत्सं वर्धयति । एवं मतिं कुर्वन्निव एकवत्सराभ्यन्तरे क्षीरं परिणमे । इति । वत्सो वृद्धस्तृणं भक्षयन् विरमति [क्षीरपाणात्] । पुनर्गौरुदकं तृणञ्च भक्षयति । तदा [तत्] न क्षीरं विकरोति । पुरुषविमोक्षनिमित्तमज्ञं प्रधानमपि तथा इति । एवमचेतनं प्रधानं पुरुषनिमित्तं कार्यं करोति । मोक्षं प्रापयति । कदाचित्संयुनक्ति पुरुषेण, कदाचिद्वियुनक्ति । अत्यन्तविमुक्तं सत् न पुनः संयुनक्ति ॥ ५७ ॥

अथाहार्या ।

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ ५८ ॥

1. Hsn. द्वाविंशति.

Ch: औत्सुक्यनिवृत्त्यर्थं यथा लोकः क्रियां करोति ।
पुरुषस्य विमोक्षार्थमव्यक्तप्रवृत्तिरपि तथा ॥

औत्सुक्यनिवृत्त्यर्थं यथा लोकः क्रियां करोति इति । यथा लोकेऽनिश्चितमनस्को जनोऽनिश्चयनिवृत्त्यर्थं तत इतो गच्छत्यागच्छति । पुरुषस्य विमोक्षार्थमव्यक्तप्रवृत्तिरपि तथेति । प्रधानं पुरुषहेतोरौत्सुक्ययुक्तमिव पुरुषार्थं [द्विविधं] कार्यं करोति । (१) शब्दादिविषयोपलब्धिं (२) गुणपुरुषान्तरोपलब्धिञ्चेति । औत्सुक्ये निवृत्ते अतिचरमं वियोगं लभते । अव्यक्तमिति प्रधानस्य नामातरम् । अतीन्द्रियत्वात्तम इत्यपि व्यपदि[1]श्यते । कथं तर्ह्यस्तीति ज्ञायते । यथा प्रागुक्तं प[2]ञ्चविधहेतुभ्यो ज्ञायतेऽस्ति प्रधानमिति । यथोक्तमार्यायां प्राक् ।

भेदानां परिणामात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ इति ।
एवं युक्त्या प्रधानमस्तीति ज्ञायते ॥ ५८ ॥

अथाहार्या ।

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ ५९ ॥

Ch: यथा नर्तकी रङ्ग आविर्भूयान्यस्मै दर्शयित्वा निवर्तते ।
[3]पुरुषस्यात्मानं प्रकाश्य प्रकृतिर्विनिवर्तते तथा ॥

1. This and the following details are not in MV.
2. Sung ed reads '*wang*' for '*wu*' .
3. Takakusu remarks thus: The text has '*ling-e-hsiēn tzū-shen*' having obliged the spirit to be itself manifested. But it is probable that the translator has ill understood *puruṣasya... ātmānam prakāśya*, having shown herself to the spirit. Well, if he ill understood the text, how could he have translated correctly the portion of the commentary on

यथा नर्तकी रङ्ग आविर्भूयान्यस्मै दर्शयित्वा निवर्तते इति। यथैको नर्तकः पुरुषः गीतनृत्यादि प्रियं कृत्वा प्रेक्षकेभ्य आत्मानं दर्शयति। अन्यस्मिन् मां द्रष्टवति [1]मम कार्यमवसितमिति पटान्तरे तिरोभवति। प्रकृतिरप्येवम्। यदि वा बुद्धिभावेनात्मानं प्रदर्शयति। [1260, c. 2] यदि वाहङ्कारभावेनात्मानं प्रदर्शयति। यदि वा पञ्चतन्मात्रपञ्चेन्द्रियपञ्चकरणपञ्चभूतादिभावेनात्मानं प्रदर्शयति। यदि वा सत्त्वरजस्तमस्त्रिगुणभावेन चात्मानं प्रदर्शयति। आत्मानं दर्शयित्वा पश्चाद् दूरान्निवर्तते। न पुनः [पुरुषः] तापत्रयमनुभवति। [2]अत उक्तं पुरुषस्यात्मानं प्रकाश्य प्रकृतिर्विनिनिर्तते तथेति ॥ ५९ ॥

पर आह। प्रकृतेः प्रकृत्यात्मकं प्रकाशयन्त्याः कियद्विधा उपायाः सन्ति। आर्ययोत्तरमाह।

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥

---

puruṣasya, etc? In the commentary he translates: 'like an actor, Prakṛti manifests herself sometimes as intellect, etc. It is, therefore, quite improbable that he has ill understood it. With regard to the Chinese text, two explanations are possible. Firstly, the character which conspires to misrepresent the Sankṛt text, is '*ling*' 'to make', 'to cause'. If we read for it '*wei*' 'for the sake', 'on account of', the difficulty disappears. *wei* is very aften used to translate the genitive and dative of the Sanskṛt.

Another explanation is that the character *ling* has generally the function of making the following verbs causal. The Sanskṛt word *prakāśya* being formed from causal stem *prakāśaya* here, it is, I think, translated into Chinese with causal sense.

1. Three eds. omit **मम.**

2. MV. has an ex. here: यथा जलवाहकस्य घटाभावे तदाधेयस्य उदकस्याभावः। तथा दुःखाभावः।

Ch: नानाविधैरुपायैरुपकरोति अनुपकारिणः।
गुणव[1]ती अगुणस्य, [2]परार्थमपार्थकं करोति ॥

नानाविधैरुपायैरुपकरोति अनुपकारिण इति। शब्दस्पर्शरूपरसगन्धादिविषयान् पुरुषस्य प्रकाशयति। अर्थाद् इममर्थं प्रकाश्य वदति अहं त्वञ्च मिथो भिन्नौ। इति। पुरुषः प्रकृत्युपकारमनुभूय न प्रकृतेः कञ्चनोपकारं करोति। गुणवती अगुणस्य [2]परार्थमपार्थकं करोति इति। प्रकृतिर्गुणवती [गुणो] यदुत सत्त्वरजस्तम इति। पुरुषस्तु निर्गुणः। यथा [3]कश्चिन्मनुष्यो बन्धूननुकूलयति सुहृदो वर्धयति। न तदुपकारं प्रतीक्षते। एवं प्रकृतिः पुरुषनिमित्तं कार्यं मोक्षपर्यन्तमर्थवशात्करोति। पुरुषो न कदापि तदुपकारकार्यं प्रत्यर्पयति। अत उक्तं परार्थमपार्थकं करोतीति ॥ ६० ॥

पर आह। पुरुषः सम्यक् सर्वथा प्रधानं दृष्ट्वा पश्चान्मुच्यते। [स] किं संमुग्धं[4] पश्यति। आर्ययोत्तरमाह।

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिः[5]।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ ६१ ॥

Ch: अत्यन्तं सुकुमारा प्रकृतिः, मे मतिर्न पुनः किञ्चिद्वस्तु [ततः सुकुमारतरम्] इति; अहं दृष्टास्मि इति तद्धेतोस्तिरोभवति, न दर्शयति [पुनरात्मानम्] ॥

---

1. lit. [she] possesses guṇas towards that which has no guṇa. Takak. translates thus: Endowed with guṇas, she gives to that which has no guṇa.

2. Three eds. प्रकृतिः करोति for परार्थम्

3. MV. has a similar ex.

4. '*fang-fu*' संमुग्ध? 'confusedly' (Takak.); cf. Jaya's introductory sentence here.

5. *me* refers to Puruṣa, says MV.: ममेति पुरुष आत्मानं ब्रवीति. Accoding to Jaya and perhaps CHC. also, it refers to Prakṛti. GB. seems to explain it with reference to the author. STK is not clear.

अत्यन्तं सुकुमारा प्रकृतिः, मे मतिर्न पुनः किञ्चिद्वस्तु [ततः सुकुमारतर-मिति । यथा लोके दृश्यते, कस्य चित्पुरुषस्यास्त्युत्तमगुणयुक्ता स्त्री । अथ पश्यति द्वितीयां स्त्रियम् । तस्या गुण अत्युत्तमः । तदा मतिं करोति इयं स्त्री अत्युत्तमा । अनुपमा[1] इति । प्रकृतिरप्येवम् । चतुर्विंशतिपदार्थेषु नैकः पदार्थोऽस्ति यथा सा प्रकृतिः सुकुमार[तरा] । कथमेवं ज्ञायते । अन्यदर्शनानुभवाक्षमत्वात् । पर आह । नैतद्युज्यते । पुरुषकैवल्यं न प्रकृतिदर्शनात् । यथाहुरीश्वरकारणवादिन आचार्याः ।

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव वा[2] ॥ इति ।

पुरुषो यदि प्रकृतिं पश्यति तदा प्रकृतिर्न निवर्तते । अतः प्रकृतिः सुकुमारेति न सिद्ध्यति । अथ स्वभावकारणवादिन आचार्या आहुः । [पुरुषः] प्रकृतिं दृष्ट्वा मुच्यत इतीदं न युज्यते । मोक्षस्य स्वभावलब्धत्वात् । यथाह पूर्वं श्लोकः ।

ये[3]न शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
[1260, c. 3] मयूराश्चित्रिता येन स नो वृत्तिं विधास्यति ॥ इति ।

एवं सर्वो लोकः स्वभावकारणकः । तस्मान्मोक्षः स्वभावतः न प्रकृत्या । अथ केचिदाचार्या वदन्ति । यदि प्रकृतिं पश्यति, तदा मोक्ष इतीदं न युज्यते । पुरुषद्वारा मोक्ष[लाभ]ात् । यथोक्तं श्लोके ।

चतुर्वेदाः पठन्ति भूतं भव्यं पुरुषः ।
जन्ममरणादीश्वरो नातःसंसारी[4] ।

1. *wu-kêng-chi-chê*, 'without rival'

2. This verse is quoted both in MV. and GB. CHC. reads पुरुषो मूढोऽनीशः आत्मन......नरकमेव च । Read '*tsai*' for '*hsin*' in the second quarter of the verse. This verse is also quoted as *āgama* in the Nyāyavārtika, Chawk. ed. p. 467.

3. GB. reads केन for येन. *v.* note on p. 41 above.

4. lit reads : न विश्वगामी । MV. वेदवादिनः पुनरिद्धं कारणमाहुः । पुरुष एवेदं सर्वम् इत्यतः पुरुषं कारणमाहुः । CHC. probably refers to this Vedic text : पुरुष एवेदं सर्वम् । यद् भूतं यच्च भव्यम् । उतामृतत्वस्येशानः ।.

तस्मान्मोक्षो न प्रकृतिदर्शनाद्भवति । समाधीयते । भवतोक्तमीश्वरः कारण-मिति । एतन्न युज्यते । कथमेवम् । निर्गुणत्वात् । ईश्वरो न त्रिगुणयुक्तः । लोकस्तु त्रिगुणयुक्तः । कार्यकारणयोर्वैरूप्यान्नेश्वरः कारणं भवति । प्रकृतिरेव त्रिगुणयुक्ता । लोकस्य त्रिगुणत्वात्प्रकृतिकारणकत्वं ज्ञायते । तस्मात्पुरुषोऽपि न कारणम् । त्रिगुणरहितत्वात् । स्वभावो लोककारणमितीदं न युज्यते । प्रत्यक्षानुमाना-गोचरत्वात् । प्रत्यक्षप्रमाणं [यत्] पूर्वं कारणं पश्यामः पश्चात्कार्यमुपलभामहे । अनु[1]मानज्ञानं [यत्] अनेन प्रत्यक्षेण दृष्टाद् भूतभाविज्ञानमप्येवमित्यनुमिमीमहे । [2]यद्युच्यते भवता आप्तवचनाद[यं स्वभावो]ज्ञायते इति । एतन्न युज्यते । वितथ[3]-वादित्वादाप्तो न सिद्ध्यति ।

पर आह । पुनर्वचनानि सन्ति यत् कालः कारणं भवतीति । यथोक्तं श्लोके ।

कालः पचति भूतानि कालः संहरते जगत् ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः[4] ॥ इति ।

सर्वाणि कार्याण्यपि कालेन भवन्ति । तस्मात्प्रकृतिदर्शनद्वारं विना मोक्षो लभ्यते । समाधीयते । न कालः कारणम् । त्रिषु संग्रहेष्वसत्वात् । प्रकृतिविकृतिपुरुषाः सर्व-धर्मान् संगृह्णन्ति । त्रिकं विहाय धर्मान्तरमन्ततो नास्ति । एषु कालो नान्त[5]र्भूतः ।

Here Takak. remarks: The last quarter is not clear. One might translate also 'who, having gone everywhere, go no more anywhere'......

The Japanese commentator says: 'who have accomplished their religious acts and who have to suffer no more misery on earth'.

1. Three eds. read *pi-chih*. Other eds.: *i-chih*.

2. Three eds. omit यदि-

3. Ibid. वितथं वदति, तस्मात् etc.

4. This verse is cited both in MV. and GB. MV. reads सृजति for पचति, प्रजाः for जगत् and in the last quarter तस्मात्कालस्तु कारणम् Chin.—कः कालं तिरस्कर्तुं शक्नोति·

5. व्यक्तमव्यक्तं पुरुष इति त्रयः पदार्थाः । तत्र कालोन्तर्भूतः—MV.

अतो ज्ञायते कालो नास्तीति । विकृत्यात्मकोऽयं काल इत्युच्यते । अतीतविकारोऽतीतकाल इत्याख्यायते । वर्तमानानागत[विकारा]वप्येवम् । तस्मात् ज्ञायते काल-इति विकारस्य नामान्तरम् । तदर्थमेव प्रकृतिः सुतरां कारणमिष्यते । यदा पुरुष एवं सम्यक् ज्ञानं लभते । तदैव सम्यक् प्रकृतिं पश्यति । प्रकृतिश्च तदैव निवर्तते । प्रकृतेर्निवृत्तत्वात्पुरुषो मुच्यते। अत उक्तं अत्यन्तं सुकुमारा प्रकृतिः, मे मतिर्न पुनः किञ्चिद्वस्तु [ततः सुकुमार तर]मिति । यथा कु[1]लीना [1261] स्त्री काचित् सुशीला । कश्चित्पुरुषो हठादागत्य पश्यति [एनाम्] । इयं स्त्री तदा लज्जिता तिरोभवति । प्रकृतिरप्येवम् । यदि पुरुषः सम्यक् पश्यति । तदा निवर्तमाना तिरोभवति । पुरुष एव केवलो भवति ॥ ६१ ॥

पर आह । लोकाः प्राज्ञाश्च समानं वदन्ति । पुरुषो[2]बध्यते पुरुषो मुच्यते पुरुषः संसरति संसारे इति । इदं वचनं किं तथ्यं किमतथ्यं वा । समाधीयते । इदं वचनमतथ्यम् । यथाहार्या ।

तस्मान्न बध्यते[3] नापि मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ ६२ ॥

Ch: पुरुषो न बध्यते न मुच्यते न संसरति संसारे ।
संसरति बध्यते मुच्यते प्रकृतिरेव ॥

पुरुषो न बध्यते न मुच्यत इति । पुरुषो न बध्यते । कथमेवम् । निस्त्रिगुणत्वात्, सर्वगतत्वात्, अविकारत्वात्, निष्क्रियत्वात्[4] । गुणवत्त्वाद्बन्धनं भवति । पुरुषो निर्गुणः । अतो नास्ति प्रकृतिबन्धः । सर्वगतत्वादिति । बद्धःपदार्थस्तत्र वास्ति

1. MV. has the same ex,
2. Three eds. omit पुरुष.
3. So MV. GB. and Candrkā. But STK. and Jaya read : तस्मान्न बध्यतेऽद्धा न मुच्यते etc.
4. MV. has three arguments with an alteration, अकर्तृत्वात् in the place of निस्त्रिगुणत्वात् but without further explanation except in the case सर्वगतत्व. In this respect MV. seems to be an abridgement of some other original.

अत्र वा । अत्र विद्यमानो न तत्र गच्छति । तस्माद्बद्ध इत्युच्यते । पुरुषस्तु नास्ति तत्र वा अत्र वा(=सर्वगतः) । तस्मान्न बन्धनयुक्तः । अविकारत्वादिति । बुद्धेर्यावद्भूतेभ्यो विकृतमिदं [सर्वं] प्रकृतिसम्बन्धि न पुरुषसम्बन्धि । तस्मात्पुरुषो न विकृतिबद्धः । निष्क्रयत्वादिति । पुरुषो न कारकः । अतः कार्यं न करोति । दक्षिणादिकार्याणि सर्वाणि प्रकृतिसम्बन्धीनि। अतः पुरुषो न दक्षिणाबद्धः। न बध्यते चेत्तो न मुच्यते । अर्थात्स्वभावतो मुक्तः । संसरतीति । सर्वगतः कथं संसरेत् । अनधिगतप्रापणं हिं संसरणमुच्यते। पुरुषस्याप्राप्तदेशो नास्ति। अतो न संसारित्वम्। यदि कश्चिन्मनुष्यो न जानाति इदं तत्त्वम् । तदा वदेत् पुरुषो बध्यते संसरति चेति । पर आह । तथा चेत्को बध्यते संसरति च । उत्तरमाह । संसरति बध्यते मुच्यते प्रकृतिरेव इति । प्रकृतिविकृतिदक्षिणाभिरात्मानं बध्नाति । पञ्चतन्मात्र[रूप] सूक्ष्मशरीरं त्रयोदशविधकरणैर्युक्तं त्रिविधबन्धैर्बद्धं सत् त्रिविधलोकसर्गान् संसरति । यदि सम्यज्ज्ञानमुत्पद्यते । तदा त्रिविधबन्धमोचनक्षमं संसारान्निवर्तते । तदैव मुच्यते । अत उक्तं त्रयो लोकाः प्रकृत्याश्रयेण व्यापारान् कुर्वन्ति । इति । [अतो] यद्युच्यते भवता पुरुषो लोके बध्यते संसारान्मुच्यते इति । एतन्न युज्यते ॥ ६२ ॥

(रूपैः सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषस्यार्थं प्रति विमोचयत्येकरूपेण[1] ॥ ६३ ॥)

अथाहार्या ।

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥

Ch: एवं तत्त्वानामपरिशेषमभ्यासात्
नाहं[2] [न] ममेति अविपर्ययं विशुद्धं केवलं ज्ञानं भवति ॥

1. This K. is not translated into Chinese and seems to be an interpolation posterior to the time of Paramārtha.
2. Chinese has only 2 modes of knowledge, viz. (1) *na aham* and (2) *na mama*. But all the commentaries and texts of SK. uniformly have 3 modes of knowledge adding *na asmi*

एवं तत्त्वेति । यथा प्रागुक्ताः पञ्चविंशतिपदार्थाः । अपरिशेषमभ्यासादिति । षड्ज[त्यवलोकनेषु] बहुवारमभ्यासाद् अपरिशेषेति । अभ्यास[1261, c. 2] पर्यवसानात् ज्ञानमुत्पद्यते । अनेन ज्ञानेन नास्ति[1]ग्रहः अहंग्रहः ममग्रहः एते त्रयो ग्रहाः पञ्चविपर्ययाः सर्वेऽपि क्षीयन्ते । सर्वाणि कार्याणि शरीराणि च प्रकृतिकृतानि, [2]नाहं न मम । सर्वस्य प्रकृतिसम्बन्धित्वात् । तदभ्यासेन परिशुद्धं केवलं ज्ञानमुत्पद्यते । अनेन ज्ञानेन पुरुषो मुच्यते ॥ ६४ ॥

पर आह । अनेन ज्ञानेन पुरुषः किं करोति । आर्ययोत्तरमाह ।

तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः[3] ॥ ६५ ॥

---

to the 2 above mentioned. So this reading is certainly an old one. Nevertheless, it is to be admitted that there were also some Sāṅkhya philosophers who adhered to the 2 forms of knowledge. For, the author of Carakasamhitā, who follows the Sāṅkhya system closely in the metaphysics, speaks of only the 2 modes of knowledge in the following verse :.............. तत्र चोत्पद्यते स्वता । यावन्नोत्पद्यते सत्या बुध्दिर्नैतदहं यथा । नैतन्मम च विज्ञाय ज्ञः सर्वमतिवर्तते ॥ Carakasam. Sarira, 1, 151.

1. Takakusu remarks ; The first false idea, '*wu*' 'not,' 'nothing' is strange. The Bombay edition of Wilson's text has *nāsti* in the place of *nāsmi*. But the act of isolating *nāsti* and making of it the false idea is misconstruction of Para's.

2. So Three eds. Other eds. नास्ति, नाहं, न मम. It is interesting to note the Three eds. give only the 2 modes of knowledge in conformity with K. which as stated above, (*v. p .91* note, 2) speaks of 2 modes only. This, at least, gives rise to a grave suspicion in our mind regarding the originality and reliability of its previous portion of the commentary which misrepresents the first false idea as *nāsti*.

3. So MV. GB. and Jaya. But STK. reads स्वच्छः । Chinese seems to read सुस्थः, 'seated tranqually.' Takak's text : सुष्ठ :, confirms the Chinese reading.

Ch: ज्ञानेन निवृत्तप्रसवां पुरुषार्थ[वशा]न्निवृत्तव्यापाराम् ।
पुरुषः प्रकृतिं पश्यति सुस्थः प्रेक्षक इव ॥

ज्ञानेन निवृत्तप्रसवामिति । एतत्तत्त्वज्ञानेन प्रकृतिर्निवृत्तबुद्ध्यहङ्कारपञ्चतन्मात्रादिप्रसवा । यथोक्तं श्लोके ।

यथा धान्यं सजलक्षेत्रमपि निस्तुषं न प्ररोहति ।
तथा प्रकृतिरपि न प्रसूते ज्ञानबलेनाभिभूतत्वात् ॥ इति[1] ।

पुरुषार्थ[वशा]न्निवृत्तव्यापारामिति । पुरुषार्थक्रिया, द्विविधकार्यं (१) विषयोपभोगः (२) प्रकृतिपुरुषान्तरदर्शनञ्च परिसमाप्तमित्यतः प्रकृतिः सर्वव्यापारान्निवर्तते । पुरुषः प्रकृतिं पश्यति सुस्थः प्रेक्षक इवेति । यथा [कश्चि]न्नर्तकं पुरुषं स्त्रियं वा प्रेक्षते स्वस्थ आसीनः । पुरुषोऽप्येवं नानाविधव्यापारेषु एनां प्रकृतिं प्रेक्षते । पुरुषो नान्ततश्चलति । इमां मतिं कुर्वन्निव सर्वजनबन्धः सर्वजनमोक्षश्च, एतद्द्वितयं[2] तदी[3]यमिति ॥ ६५ ॥

पर आह । ज्ञानं प्रकृतिपुरुषयोः किं करोति । आर्ययोत्तरमाह ।

दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरतान्या ।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥

Ch: मया दृष्टमित्युपेक्षकः[पुरुषः] अहं दृष्टा इत्युपरता [प्रकृतिः] ।
प्रकृतिपुरुषयोः संयोगेऽपि प्रयोजनाभावान्न सर्गः ॥

मया दृष्टमित्युपेक्षकः [पुरुष]इति । यथा लोके पुरुषो नानागीतनृत्यां नर्तकीं दृष्ट्वा मया दृष्टमिति मतिं कृत्वा अलम् इति उपेक्षकस्तिष्ठति । नर्तकी मम व्यापारो दृष्ट इति

---

1. Takak. says : 'This verse comes without doubt from Pātañjala Yogasūtra. The idea is also given in Alberuni, Indica, 1 p. 55;' cp. Vyāsabhāṣya on II, 13, p. 69 Anandaś ed. 1904.

2. Three eds. omit द्वितय

3. Yuan and Ming eds. read '*chu*' for '*chi*' hence द्वितयमियं करोति·

चिन्तयन्ती अन्तर्भूय निवर्तते । अत्र पुरुषोऽप्येवं प्रकृतिं दृष्ट्वा उदासीनस्तिष्ठति । प्रकृतिरप्येवं दृष्टा[हं] इति निवर्तते । पर आह । पुरुषः सर्वगतः । प्रकृतिरपि सर्वगता । अनयोः संयोगः सदास्ति । न वियोगः । अस्मात्संयोगात्कथं न पुनः शरीरमुत्पद्यते । उत्तरमाह । प्रकृतिपुरुषयोः संयोगेऽपि प्रयोजनाभावान्न सर्ग इति । भवतोक्तं प्रकृतिपुरुषयोः सर्वगतत्वात्सदासंयुक्तत्वमिति । सत्यमेवम् । यद्येवम् । कथं न पुनः सर्गः । सर्गस्य प्रयोजनाभावात् । सर्गस्य प्रयोजनं द्विविधम् । आद्यं, पुरुषस्य विषयसंयोगः । [1261, c. 3] अन्तिमं, पुरुषस्य प्रकृतिभेददर्शनम् । एतदुभय-प्रयोजनस्य दृष्टावसानत्वान्न पुनः सर्गः । पर आह । यद्येवम्, प्रयोजनमनवस्थितम् । संयोगस्य कारणत्वेन सत्वात् । समाधीयते । सम्यग् ज्ञानबलात् । अनेन ज्ञानेन पुरुषः प्रकृतिं दृष्ट्वा पक्वोद्वेगो दर्शनान्निवर्तते । पुनः संयोगेऽपि न सर्गो लभ्यते । यथो[1]त्तमर्णाधमर्णौ पूर्वमृणार्थं संयुक्तौ । प्रत्यर्पितर्णयोः संयोगेऽपि न पुनर्मिथः सम्बन्धः । प्रकृतिपुरुषावप्येवम् ॥ ६६ ॥

पर आह । यदि ज्ञानान्मोक्षो लभ्यते । भवानपि ज्ञानी । अहमपि ज्ञानी । कथमुभौ न युगपन्मुक्तौ । आर्ययोत्तरमाह ।

सम्यग् ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः ॥ ६७ ॥

Ch: सम्यग् ज्ञानाद्धर्मादीनि कारणानि न सिद्ध्यंति ।
संसार उपरतः चक्रवत् शरीरं [तु] ध्रियते[2] ॥

सम्यग् ज्ञानाद्धर्मादीनि कारणानि न सिद्ध्यन्ति इति । सम्यगिति । यथा-भूतं पञ्चविंशतितत्त्वज्ञानम् । ज्ञानमिति तत्त्वानि पञ्चविंशतिः नाधिकं न न्यूनम् ।

---

1. MV. and GB. have the same ex. MV. has another also यथा वा वृद्धसंयोगादपत्यं न भवति प्रयोजनाभावात् ।

2. This line may also read : संसारे तिष्ठति चक्रवत् धृतशरीरः ।
Three eds. read ; निगृह्यते, निरुध्यते, or निगृहीत, निरुद्ध.
Takak. reading the character '*shen*', 'body' together with the preceding '*lun*' 'wheel' translates : 'like the body of the wheel,' etc. But it is hardly satisfactory.

अनेन ज्ञानबलेन (१) धर्म (२) अधर्म (३) अज्ञान (४) वैराग्य (५) अवै-राग्य (६) ऐश्वर्य (७) अनैश्वर्याणि इमानि सप्त दग्धानि नश्यन्ति । अतो न कारणव्यापारसमर्थानि । [1]यथा धान्यमग्निदग्धं न पुनः प्ररोहति । एवं सप्तविधानि ज्ञानाधिगमात् [कारणानि] न सिद्ध्यन्ति । ईदृ[2]शः पुरुषः गच्छति आगच्छति च संसारे । अतः प्राक्कालीनैर्धर्मादिभिः पूर्वकालनिमित्तैः सप्तसु स्थानेषु संसरति । इदानीं ज्ञानवशात् तानि निमित्तानि नैमित्तिकानि न जनयन्ति । यथातपत्रेऽसति छायापि नानुसरति । एवं पूर्वनिमित्ताभावादिदं शरीरमपि न भवति । एवं ज्ञानी पुरुषः पूर्वकालकृतनिमित्तस्योपरमादुपरमति निगृहीतचक्रवत् ॥ ६७ ॥

पर आह । यदि पुरुषो ज्ञानमधिगच्छति । कदा मोक्षं लभते । आर्ययोत्तरमाह ।

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ ६८ ॥

Ch: शरीरभेदे सति चरितार्थप्रधानविनिवृत्तौ च ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यं सिद्ध्यति ॥

शरीरभेद इति । पूर्वकृतधर्माधर्मयोर्ध्वंसे[3] एतच्छरीरसंभेदे, अन्तःशरीरं विद्यमानं पार्थिवभूतं बाह्यपृथिवीं प्रति निवृत्य संयुज्यते । यावदाभ्यन्तरमाकाशमपि आकाशमहाभूतं प्रति निवर्तते । पञ्चेन्द्रियाणि पञ्चतन्माणि प्रति निवर्तन्ते । यावन्मन इन्द्रियमपि पञ्चतन्माणि प्रति निवर्तते । चरितार्थप्रधानविनिवृत्ताविति । सर्वारम्भस्य

---

1. This ex. occurs in MV. GB. and Jaya.

2. '*Ju—shih—chih—jen,*' is translated by Takak. as 'We other men.' These characters would literally mean ' like–this–man,' 'a man of this sort,' 'such a man.' So there is no character for the 1st personal pronoun 'We.' Takak takes obviously the phrase refering to other than the wise. But the text as stands in the printed book is certainly not to that effect. The opinion of Vātsyāyanabhāṣya may be contrasted here: सर्वाणि पूर्वकर्माणि ह्यन्ते जन्मनि विपच्यन्ते । Cf. वैशेषिकसूत्र V. 2, 18 with *Upaskāra* also.

3. Three eds. अध्वंस.

जननमरणकार्यस्य मोक्षकार्यस्य च परिपूरितत्वात्प्रधानं पुरुषाद्विनिवर्तते । अस्मिन् समये ऐकान्तिकमात्यन्तिकञ्चोभयं कैवल्यं सिद्ध्यति । ऐकान्तिककैवल्यमिति । तत्त्वज्ञानात् [1262] चिकित्सायाः सर्वमतविभिन्नवादानाञ्च व्यावृत्तिः । आत्यन्तिकमिति । चतुर्वेदफलस्य ज्ञानवैराग्याभ्यामनुत्पन्नस्य फलस्य च व्यावृत्तिः । कैवल्यम्[1], ऐकान्तिकमद्वितीयम् । आत्यन्तिकमपुनरन्तम् । एतदुभयं कैवल्यमुभय[2]कालमध्यकैवल्यम् ॥ ६८ ॥

पर आह । किंप्रयोजनमिदं सम्यग् ज्ञानम् । आर्ययोत्तरमाह ।

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥

Ch: इदं ज्ञानं पुरुषार्थं गुह्यं परमर्षिणा समाख्यातम् ।
लोकानामुत्पत्तिस्थितिप्रलया अत्र चिन्त्यन्ते ॥

इदं ज्ञानं पुरुषार्थमिति । इदं ज्ञानं पञ्चविंशतितत्त्वानां सम्यग् ज्ञानम् । पुरुषार्थमिति । कैवल्यं मोक्षः । गुह्यं परमर्षिणा समाख्यातमिति उपचारवचनोऽगूढं प्रकाशाक्षमं, सदाचार्यं विना अलभ्यत्वात् । गुह्यम् पञ्चगुण [युक्त] ब्राह्मणेभ्यो देयम् । नान्येभ्यः । अतो गुह्यं नाम । [3]पञ्चगुणाः (१) साधुजन्मक्षेत्रत्वम् । (२) साधुगोत्रत्वम्, (३) [4]साधुचारित्वम् । (४) शक्तिमत्वम्, (५) लिप्सा, [इतीमे] । एतज्ज्ञान [कारण] संपन्ना धर्मदानार्हाः । अन्ये तु नार्हाः । अतो गुह्यमिति भाष्यते । परमर्षिणा समाख्यातमिति । कपिलमहर्षिणा यथाक्रममाख्यातम् । पर आह । अस्मिन् ज्ञाने किं चिन्त्यते । उत्तरमाह । लोकानां स्थित्युत्पत्तिप्रलया अत्र चिन्त्यन्ते ।

1. ऐकान्तिकमवश्यभावित्वाद् आत्यन्तिकमपुनरावृत्तित्वात्—MV.

2. This portion is not clear. I have translated it literally. Takak's translation : 'Isolation takes place in the two cases explained above.

3. MV. has not these details.

4. Three eds. omit साधु.

लोका ब्रह्मादि[1]स्तम्बपर्यन्ताः [2]एषामुत्पत्तिस्थितिप्रलयाः । उत्पत्तिरिति । प्रधानाद्बुद्ध्युत्पत्तिः यावत्पञ्चमहाभूतोत्पत्तिः । स्थितिरिति । सूक्ष्मशरीरेण भावैरधिवासितेन त्रिषु लोकेषु संसरणम् । प्रलय इति । अष्टसिद्धिभिरात्यन्तिककैवल्यप्राप्तिः । इमे त्रयोऽर्था ज्ञाने प्रकाश्यन्त इति त्रीन् विहाय नाधिकोऽर्थोऽस्ति । अतः पार्यन्तिकं ज्ञानम् ॥ ६९ ॥

पर आह । एतज्ज्ञानं कुतो लब्धम् । आर्ययोत्तरमाह ।

एतत्पवित्र्यमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधाकृतं तन्त्रम्[3] ॥ ७० ॥

Ch: एतत् ज्ञानमग्र्यं पवित्र्यं मुनिरनुकम्पया प्राह ।
पूर्वमासुरये ततः पञ्चशिखाय ॥

एतत् ज्ञानमग्र्यं पवित्र्यमिति । इदं ज्ञानं पुरा चतुर्षु वेदेषु अनुदितेषु प्रथमतःसिद्धम् । अस्मात् ज्ञानात् चत्वारो वेदाः सर्वाणि च मतानि पश्चात्संसिद्धानि । अत उक्तं सर्वेषामग्र्यमिति । त्रिविधदुःखेभ्यः चतुर्विंशतिमूलदुःखेभ्यः त्रिविधबन्धेभ्यश्च पुरुषोऽनेन ज्ञानेन प्रतिनिवृत्तः केवलो मुच्यते । अत उक्तमिदं ज्ञानं पवित्र्यमिति । मुनिरनुकम्पया प्राहेति । क आदाविदं ज्ञानमलभत । यदुत कपिलमहर्षिः । यथोक्तं प्राक् । कपिलमहर्षिः प्रथमप्रादुर्भूतः धर्मज्ञानवैराग्यैश्वर्य-[रूप] चतुर्गुणयुक्त एतत् ज्ञानं लब्ध्वा परमानुकम्पया प्रोवाच । [1262, c. 2] अन्यांस्तितीर्षुरिदं ज्ञानं संरक्ष्य परमकारुणिकत्वात् पूर्वमासुरये प्रोवाच । अयमासुरिमहर्षिस्ततः पञ्चशि[4]खाय प्रोवाच । अयं पञ्चशिखः षष्टिसहस्रगाथात्मकं विपुलं तन्त्र-

1. Read '*chu*' (R. 75) for '*chu*' (R. 9)

2. lit. एषु.

3. This and the following two verses are lacking in GB. Beneres ed. 1905.

4. Three eds. read : पञ्चशिखाय बिन्ध्यवासाय च प्रोवाच । इमौ पञ्चशिख-विन्ध्यवासौ, etc.

मुक्तवान् । कपिलमहर्षि रासुरये संक्षिप्यैवमुवाच । तम[1] एव खल्विदमग्र आसीत् । तस्मिन् तमसि क्षेत्रज्ञोऽवर्तत । क्षेत्रज्ञः पुरुषः । पुरुष आसीत् न ज्ञानमासीत् । अतः क्षेत्रमिति भाष्यते । ततः परिणामः प्रावर्तत । अयमाद्यः परिणामः प्रावर्तत यावन्मोक्षम् । [इति] । आसुरिमहर्षिरपि पञ्चशिखाय तथावोचत् । अयं पञ्चशिखः षष्टिसहस्रगाथात्मकमिदं ज्ञानं विपुलमवोचत् । क्रमेण यावद्ब्राह्मणाय कौशिकगोत्रायेश्वरकृष्णाय । [यः] सप्ततिकारिका ग्रथयामास ॥ ७० ॥

अत आर्यामाह ।

शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग् विज्ञाय सिद्धान्तम् ॥ ७१ ॥

Ch: शिष्यपरम्परयागतमाचार्योपदिष्टं ज्ञानम् ।
ईश्वरकृष्णः संक्षिप्योक्तवान् सम्यग् विज्ञाय सिद्धान्तम् ॥

शिष्यपरम्परयागतमाचार्योपदिष्टं ज्ञानमिति । इदं ज्ञानं कपिलाद् आसुरेरागतम् । आसुरिणा पञ्चशिखस्योपदिष्टम् । पञ्चशिखेन गार्ग्यस्योपदिष्टम् । गार्ग्येण उलूकस्योपदिष्टम् । उलूकेन वा[2]र्षगणस्य[3] । वार्षगणेन ईश्वरकृष्णस्य । एवं

1. This quotation occurs both in MV. and Jaya. MV. has —तम एव खल्विदमग्र आसीत् । तस्मिन् तमसि क्षेत्रज्ञोऽभ्यवर्तत प्रथमम् । तम इत्युच्यते प्रकृतिः । पुरुषःक्षेत्रज्ञः । Jaya—तम एव खल्विदमासीत् । तस्मिन् तमसि क्षेत्रज्ञ एव प्रथमः । तमः प्रधानम् । क्षेत्रज्ञः पुरुष उच्यते ।

2. वार्षगण = वार्षगण्य of the Epic. The term *vārṣa* is transliterated into Chinese as '*po-po-li.*' Takak. says that '*po-li-so.* may be read for '*po-po-li*'. He further explains thus: All those who are familiar with the Chinese Buddhist works, know that '*po*' is often written for *so*, or vice versa. Suppose we have here this misplace and also '*so-li*' has been taken for '*li-so*' by such interversion that presents itself frequently. In that case we obtain '*po-li-so*' which may be restored into *vārṣa* or *varṣa*; *v.* his Introduction pp. 59–60.

3. Three eds. add उपदिष्टम्.

[1]क्रमेण ईश्वरकृष्ण इदं ज्ञानमलभत । महातन्त्वं दुर्ग्रहमपश्यत् । अतः संक्षिप्यार्यासप्ततिं रचयामास । यथोक्तं प्राक् दुःखत्रयाभिघातात् जिज्ञासा तदभिघातके हेतौ । इत्यादि । अत उक्तं ईश्वरकृष्णः संक्षिप्योक्तवान् विज्ञाय सिद्धान्तम्[2] । इति ॥ ७१ ॥

इह मेधावी कश्चिदाहार्याम् ।

सप्तत्यां किल येऽर्थाःतेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चेति ॥ ७२ ॥

Ch: इदमार्यासप्ततितन्त्रं षष्टिसहस्र[तन्त्र]ार्थान् कृत्स्नान् ।
संगृह्णाति, अत्रोक्तः प्रत्ययसर्गः पञ्चाशत्पदार्थपर्यन्तः ॥

तेऽर्था एतदर्थबहिर्भूताः[3] । यथाह पूर्वमार्या ।

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्देन तस्य भेदास्तु पञ्चाशत् ॥ इति ।

पुनःसन्ति दशार्थाः । यथोक्तं[4] पद्ये ।

1. MV. has this lineage of teachers: कपिलादासुरिणा प्राप्तमिदं ज्ञानम् । ततः पञ्चशिखेन । तस्माद्भार्गवोलूकवाल्मीकिहारीतदेवलप्रभृतिनागतम् । ततःतेभ्य ईश्वरकृष्णेन प्राप्तम् । Jaya . मुनेरासुरेःपञ्चाशिखः तथा गर्गगौतमप्रभृति......ईश्वरकृष्णनामानं परिव्राजक.........

2. MV. interprets this word in a fanciful manner: कार्यकारणसिद्धस्य शरीरस्यान्तोऽपुनर्भवः मोक्षः । तस्य तादात्म्यमित्यर्थः । तत्सिद्धस्य शरीरस्य सूक्ष्मस्य तान्मात्रिकस्य सर्गादिभावस्य अन्तो मूर्तिनाश इति वा । According to Chinese it would mean तत्त्वार्थमूलः or मौलस्तत्त्वार्थः

3. This is the translation of the first quarter of the K.

4. This verse is quoted in MV. Jaya quotes the same verse with these alterations: *akartṛbhāva* for *atho nivṛtti* and *ca śeṣavṛtti* or *viśeṣavṛtti*. But STK. quotes some 3 verses to the same effect from the Rājavārtika. It is to be noted here that CHC. MV. and Jaya differ from one another in explaining the verse, *astitva*, etc., and STK. agrees with Jaya in distributing 10 items, *astitva*, etc., among Pradhāna and Puruṣa.

अस्तित्वमेकत्वमथार्थवत्त्वं पारार्थ्यमन्यत्वमथो निवृत्तिः ।

योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य विशेषवृत्तिः ॥ इति ।

Ch: अस्तित्वमेकत्वमथार्थवत्त्वं पञ्चत्वं कैवल्यम् ।

योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य भवन्ति दशार्थाः ॥

अस्तित्वमिति । हेतौ फलास्तित्वम् । एकत्वमिति । एकं प्रधानं बहुपुरुषोपभोगमनुसृत्य परिणमते । अर्थ[वत्त्व]मिति । पुरुषस्य विषयैः संयोजनम्, पश्चाद् अन्तरदर्शनम् । [1]पञ्चत्वमिति । पञ्चयुक्तयः प्रधानं साधयन्ति पञ्चयुक्तयः पुरुषं साधयन्ति, [1262, c. 3] पूर्वोक्तवत् । कैवल्यमिति सम्यग् ज्ञानेनैकान्तिकमात्यन्तिकं कैवल्यं भवति । योगो वियोग इति । सर्वगतत्वाद्योगः । चरितार्थत्वाद्वियोगः । बहवः पुमांस इति । जन्ममरणवैषम्याद् अयमर्थो यथाप्रतिपादितपूर्वम् । स्थितिः शरीरस्येति । सूक्ष्मशरीरत्वेन यावन्न ज्ञानमुत्पद्यते । इमे दशार्थाः पञ्चाशदर्थैर्मिलिताः षष्टिसहस्रगाथासु प्रतिपादिताः । तस्मात्सप्ततिशास्त्रं षष्टिसहस्र[शास्त्र]ार्थसमर्थनम् । पर आह । महातन्त्रस्य सप्ततेश्च को भेदः । समाधीयते । [2]प्राक्कालीनार्योपदेशाः परवादनिरासाश्च तत्र सन्ति, अत्र न सन्ति । एवमर्थभेदः ॥ ७२ ॥

शास्त्रार्थः समाप्तः ॥

[इति] सुवर्णसप्ततिशास्त्रेऽन्तिमखण्डः ॥

---

1. or पञ्चभाव or पञ्चपदार्थ.

2. This is the translation of the 2nd line of the last K. Tākak. says : The commentary reproduces then what the text has omitted. It was, perhaps, impossible for the Chinese translator to enclose within the twenty characters of his verse the entire sense of the Sanskrit verse. Paramārtha seems to have been often obliged to skip in the translation of the text this or that word, free to take it up again in the commentary.

ADDITIONAL NOTES.

P. 1. line 5. Cp. Rāmāyaṇa, II, 110 ver. 5 :
आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ॥

P. 4. l. 5. The verse, षट् शतानि, etc, is also cited in the Yaśastilaka Campū, Vol. II, p. 358. The Rāmāyaṇa mentions three hundred paśus in connection with the Aśvamedha sacrifice performed by Daśaratha, (*v.* Rām. I, 14, 32).

P. 14 l. 5. अनित्यं द्विविधम् ; and p. 23 l. 4 जननं द्विविधम् ; cp. Sri Śaṅkara's Bhagavad Gītābhāṣya : नित्यस्य द्विविधत्वात् लोके नाशस्य च । यथा देहो भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते । विद्यमानोऽप्यन्यथा परिणतो व्याध्यादियुक्तो नष्ट उच्यते । (Anandaśram ed. p. 46.)

P. 18. Verse, सत्त्वं लघु, etc. ; Cf. Gītā XIV, verses, 5–17 where the three guṇas are defined with their functions.

P. 23, l. 4 *v.* add. note for p. 14 above.

P. 26 l. 10. Original of the verse, त्यज धर्मम्, etc,, may be traced in the Gītābhāṣya of Śrī Śaṅkara p. 100 (Anand ed.) :

त्यज धर्ममधर्मञ्च उभे सत्यानृते त्यज ।

उभे सत्यानृते त्यक्त्वा येन त्यजसि तत् त्यज ॥ इति बृहस्पतिः ।

This verse is also cited as Śruti in the Bhagavad Gītārthaprakāśikā (Adyar Library series, 25), p. 452. Note the last pāda of the verse in Chinese reads differently.

P. 62 Ver, धर्मेण गमनमूर्ध्वं, etc. *v.* Bhagavad Gītā, XIV, 18: ऊर्ध्वं गच्छन्ति सत्त्वस्थाः etc. which describes three grades of destiny (*gati*) according to three guṇas.

P. 72 l. 3. Cf. बृहदारण्यकोपनिषत् I, 5, 2; Sāṅkara Bhāṣya: तस्मात् परमपीडयित्वा ग्रसितुमपि न शक्यते। (Anand. ed. p. 207).

P. 74 ll.7-11. These 8 preliminaries are mentionted by Rājaśekhara (Kāvyamīmāṁsā, 3rd ed. p. 10) thus: बुध्दिमान् शुश्रूषते। गृह्णीते। धारयति। विजानाति। ऊहते। अपोहति। तत्त्वञ्चाभिनिविशते।

They are also mentioned as अष्टाङ्गा बुद्धिः in the Cākṣuṣīya ed. M. R. Kavi (Jour. S. V. O. Institute III, 1) II, 22. शुश्रूषते। शृणोति गृह्णाति। धारयति। ऊहते अपोहति। यथान्यायमभिनिविशति। जानाति चेति। Rāmāyaṇa also refers to it in the verse: बुद्ध्याष्टाङ्गया युक्तम्, etc, (किष्किन्धा, 2.) Compare Kālidāsa, Ragh. III, 30, धियः समग्रैः स गुणैः... । Mallinātha commenting upon it quotes from Kāmandaka this verse: शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा। ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥ This ver. is also found in the Cākṣuṣīya with a slightly different reading. Kauṭilīya Artha Śāstra has also this: शुश्रूषाश्रवणग्रहण-धारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुध्दिं विद्या विनयति नेतरम्॥ (I, 5, p. 10, l. 5, Mysore ed.)

P. 89 l. 11. कालः पचति, etc. This idea has already been referred to in the Rāmāy. VI, 33, verses 12-13: उद्दिष्टं दीर्घमायुस्ते दैवज्ञैरपि राघव। अनृतं वचनं तेषामल्पायुरसि राघव॥ अथ वा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव।

पचत्येनं तथा कालो भूतानां प्रभवो ह्ययम्॥

P. 100 l. 1 अस्तित्वमेकत्व, etc. This verse is attributed to Pañcaśika, also known an Cūlika in the Haravijaya, VI, 18, of Ratnākara by his commentator, Alaka, p. 85, Kavyam. ed. Note also his statement: "भेदानां परिणामात्" etc. इति प्रकृतिसाधनायोपन्यस्ताः पञ्चहेतवो वीताः। तावन्त एव ते पुरुषसाधका अवीताः। तद्यथा - सङ्घातपरार्थत्वात्, etc. Ibid. p. 86.

APPENDIX

I

Some extracts on Sāṅkhya philosophy
From the Madhyamakāvatāra, chap. VI (*Tibetan Version B.B. ed., pp.* 23[illegible] *of* Candrakīrti

आत्मा तीर्थ्यैः कल्प्यते नित्यरूपो
ऽकर्ता भोक्ता निर्गुणो निष्क्रियश्च।
किञ्चित्किञ्चिद् भेदमाश्रित्य तस्य
भेदं याता प्रक्रिया तीर्थिकानाम्॥ १२१॥

तत्र साङ्ख्या वदन्ति।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृति र्न विकृतिः पुरुषः॥ इति।

तत्र प्रकरणात्प्रधानम्। कस्यामवस्थायां सृजति[1]। पुरुषेच्छादर्शनकाले यदा पुरुषस्य शब्दादिविषयोपभोगाकारेच्छा जायते। तदा परिज्ञातपुरुषेच्छा प्रकृतिः पुरुषेण युज्यते। ततः शब्दादीन् सृजति[2]। तस्यायं क्रमः। प्रकृतेर्महान्। ततोऽहङ्कारः। ततः षोडशगणः। तस्माच्च षोडशकात्पञ्चभूतानि। पञ्चभ्यःशब्दादिभ्यः पञ्चभूतानि जायन्ते। इत्ययं क्रमः। अविकृतिरिति। यस्मात्प्रकृतिरेव। न महदादिवद्विकृतिरपि। ते हि महदाद्याः प्रकृतयो विकृतयश्च। अत उक्तं महदाद्याः प्रकृतिविकृतयः सप्तेति। महदादयोऽपि स्वविकृतिमपेक्ष्य प्रकृतयः। प्रकृतिमपेक्ष्य विकृतयश्च। बुद्धीन्द्रियादि षोडशकस्तु विकार एव। अत उक्तं षोडशकस्तु विकार इति। तु शब्दो विकार एवेति निर्धारणार्थः।

1. lit. करोति *byed.*
2. cp. *Bodhic. pañjicā* (Bl.) p. 454, L. 11 f.

पुरुषस्तु न प्रकृतिर्नापि विकृतिरित्याह । न प्रकृतिर्न विकृतिः पुरुष इति । अनेन क्रमेण उत्पन्ने सर्वविकारगणे समुत्पन्नरागः पुरुषो भोक्तेव भवति इत्युच्यते । शब्दादिषु विषयेषु श्रोत्रादिबुद्धीन्द्रियैर्मनसाधिष्ठितैः परिगृहीतेषु बुद्धिरध्यवसायं करोति ततो बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते । एवं पुरुषः चैतन्यस्वरूपः[1] । अत उच्यते आत्मा विषयानुपभुङ्क्ते इति । एवं रागेण विषयमुपभुञ्जानः यदा अल्परागत्वेन पुरुषो विषयेभ्यो विरक्तः तदा क्रमेण भावितयोगो[2] दिव्यज्ञानसमादानात् दिव्यचक्षुषा प्रकृतिं पश्यति । तेन दृष्टा सा परवधूवत् लज्जिता आत्मन्यकुपिता वियुज्यते । विकारगणः सर्वोऽपि सृष्टिक्रमाद्वैपरीत्येन तत्रैव प्रविलयाद् अनभिव्यक्तरूपो भवति । तदा पुरुष ए[3]काकी तिष्ठति । तस्मान्मुक्त आख्यायते । स विकारे प्रसक्तेऽपि पङ्गुभूतत्वेन सदा उदासीनस्वरूपस्थत्वान्नित्य[4] इति । प्रकृतिरेव कर्त्री । विकृतिष्वपि कासां चित् कर्तृत्वात् । आत्मा तु क्रियायामौदासी[5]न्यविशिष्टत्वाद् अकर्तोच्यते । भोक्तृत्वं पुनर्यथोक्तनीत्या उक्तमेव । रजस्तमःसत्त्वस्वभावाभावेन निर्गुणत्वम् । व्यापित्वेन निष्क्रियत्वम् । एवं पुरुषस्य विशुद्धत्वम् । तत्र प्रकृतिरेव कर्त्री । विकृतिष्वपि कासां चित् कर्तृत्वाद् इति किमुक्तम् । कासां विकृतीनां कर्तृत्वं, कासां विकृतीनामकर्तृत्वम् । अत्र विशिष्य वक्तव्यत्वाद् यत्किञ्चिदुच्यते । रजस्तमस्सत्त्वानि त्रयो गुणाः । तत्र रजश्चलं प्रवृत्यात्मकम् । तमो गुरु वरणात्मकम् । सत्त्वं लघु प्रकाशात्मकम् । सुखदुःखमोहा इत्येषामेव पर्यायाः । एषां साम्यावस्था प्रधानम् । अत्र हि गुणाः प्रधानभूताः प्रविलीयन्ते । तेषामविकारावस्था प्रकृतिः । प्रकृतेर्महान् । महानिति बुद्धिपर्यायः । महत अहङ्कारः । स त्रिविधः वैकृतः

1. Ibid L. 13 f.

2. Cp. the commentary on k. 51. on p. 73ff.

3. *Zag-gcig.*

4. *de.ni-rnam. par. hgyur. ba. zar. zin kyaṅ. za. bar. mi. hgyur. ba. ñid. kyis. rtag. tu. yaṅ. gar. bahi. ṅo. bor. gnas. pahi. phyir. rtag. pa. zes. byaho.*

5. *Sñom. las.*

सात्त्विकः तामस इति । [1]तत्र वैकृताहङ्कारात्पञ्च तन्मात्राणि रूपशब्दगन्धरसस्पर्शा [इति] । तन्मात्रेभ्यो भूतानि पृथिव्यप्तेजोवाय्वाकाशाख्यानि । सात्त्विकाहङ्कारात्पञ्चकर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि । पञ्चबुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणजिह्वात्वचः, उभयात्मकं मनश्चेत्येवमेकादश । तामसाहङ्कार उभयाहङ्कारस्य [सहकारी] प्रवर्तकः । तत्र महदहङ्कारपञ्चतन्मात्राणि प्रकृतिविकृतयः । दशेन्द्रियाणि मनः महाभूतानि च विकृतय एव । प्रकृतिरविकृतिरेव । इति प्रक्रिया[2] ॥

1. Note Sk. 25: 11 organs are products of the *vaikṛta ahaṅkāra*, fine elements of *tāmasa*, and *taijasa* produces both.

2. The second half of the verse आत्मा तीर्थ्यैः etc. refers to the Vedantin's view; so the portion commenting upon it is not translated here.

APPENDIX.

II

Maṇimekhalai, Chap. XXVII, ll. 202–240.

The advocate of Sāṅkhya doctrine spoke thus; What is stated to be difficult to perceive, endowed with a characteristic of no motive[1] [of any kind in serving Puruṣa], common to all and the substrate of the evolution of all things is Mūlaprakṛti.

Out of the Citta (a synonym for Prakṛti) arises intellect (*buddhi*) which is said to be Mahat. From that (lit. upon that) arises ether (*ākāya*); from that arises air; from that arises fire; from that arises the nature of water; from that arises earth; from the aggregate of these arises mind; from the mind endowed with discrimination (ஆர்ப்புறு) arises the evolute [called] individuation; from ether arise the evolutes [called] the ear and sound; from air arise the evolutes called the skin and touch; from fire arise the evolutes known as the eye and light; from the remaining (தங்கிய) water arise the evolutes called the mouth (வாய்) *i.e.*, tongue and taste; from the earth arise the evolutes called the nose and smell; as the evolutes pertaining[2] to the above stated (*i.e.*, five gross elements, etc.) arise

1. Prof. S. S. Sastri's translation of this line மனநிகழ்வின்றி "unattainable by the mind" is meaningless. Some characteristics of Prakṛti are spoken of in these lines as in Sk. 11. Prakṛti serves Puruṣa without expecting anything in return from him. It is one of her characteristics; *v.* Sk. 56, 60.

2. This line has been interpreted by S. S. Sastri to the effect that the organs of action come from the skin on the score of the word *tokku* being used in a previous line in the sense of skin (*tokhu=tvak*). The interpretation, though ingenious, lacks any support in the known literature on Sāṅkhya doctrine ancient and modern. But, on the other hand in the Mahābhārata account of the Sāṅkhya we find the five organs of action derived along with the five organs of cognition and the five sense-impressions from the five gross elements (*v.* Jour. Ind. Hist. VIII, p. 325 n. 2). The Suvarṇasaptati again derives them along with other organs and five gross elements, from the five fine elements and specially states that they are constituted of five sense-objects (*pañcaviṣayātmaka. v, ad.* K. 34). The Maṇimekhalai, I think

the following [entities] that form the organ of speech, the hands, the feet, the organ of excretion and the organ of generation. As products of the gross elements here stated arise hills, forests and others which constitute the world. These return in the same manner as they came out, and are absorbed; [these arise and return] endless and till the universal deluge.

Puruṣa is one, all-pervasive, eternal, easy to know, devoid of three guṇas, uncommon, causing the senses to cognise, not being the substrate for the evolution of anything, but being the intelligence whereby to cognise all such evolved things, the one, all-pervasive, eternal and stated to be (an embodiment of) intelligence.

There are twenty-five entities to be known[1]: earth, water, fire, air, and ether; body, tongue, eye, nose and ear; related thereto: taste, light, touch, sound and smell; organ of speech, feet, hands, organ of excretion and organ of generation, their causes: mind, intellect, individuation, Citta[2] and one soul (*ānma*) known as life (*uyir*).

following the tradition current in the Mahābhārata and the Suvarṇasaptati has derived them both from the five gross elements and the five sense-objects. This is the sense. I think, that is intended in the line: சொல்லபட்டிவற்றிற்றொக்கு விகாரமாய்.

1. S. S. Sastri's translation: 'cognizable by the senses' is incorrect, for all the 25 entities are not cognizable by senses, *e.g.*, Prakṛti and Puruṣa. So the phrase புலமார் பொருள் means entities to be known, *prameya-padārthāḥ*.

2. Prakṛti is nowhere called *citta* except in the Maṇimēkhalai. Mahān is sometimes so called, (*v.* p. 32, n. 2 above). It is, I think, due to Buddhistic influence; because it is Buddhists who hold Citta the ultimate cause of all. Prakṛti being the ultimate cause in the Sāṅkhya doctrine is given that name.

மணிமேகலை, ௨௭, ௨௦௨,—௨௦௪

இது சாங்கிய மதமென்றெடுத்துரைப்போன்
றனை யறிவரிதாய்த் தான் முக்குணமாய்
மனநிகழ்வின்றி மாண்பமை பொதுவா
யெல்லாப் பொருளுந் தோன்றுதற் கிடமெனச்
சொல்லுதன் மூலப்பகுதி சித்தத்து
மானென்றுரைத்த புத்திவெளிப்பட்
டதன் கணாகாயம் வெளிப்பட்டதன்கண்
வாயுவெளிப்பட்டதன் கணங்கி
யானது வெளிப்பட்டதன் கணப்பின்
றன்மை வெளிப்பட்டதின் மண்வெளிப்பட்
டவற்றின் கூட்டத்தின் மனம் வெளிப்பட்
டார்புறு மனத்தாங்கார விகாரமு
மாகாயத்திற் செவியொலி விகாரமும்
வாயுவிற் றொக்கு மூறெனும் விகாரமு
மங்கியிற் கண்ணுமொளியுமாம் விகாரமுந்
தங்கிய வப்பில் வாய்சுவையெனும் விகாரமு
நிலக்கண் மூக்கு நாற்ற விகாரமுஞ்
சொல்லப்பட்டிவற்றிற் றொக்கு விகாரமாய்
வாக்குப் பாணி பாத பாயுருபத்தமென
வாக்கிய விவை வெளிப்பட் டிங்கறைந்த
பூதவி காரத்தான் மலை மரமுத
லோதிய வெளிப்பட் டுலகாய் நிகழ்ந்து
வந்த வழியே யிவை சென்றடங்கி
யந்தமில் பிரளய மாயிறு மளவு
மொன்று மெங்கும் பரந்து நித்தியமா
மறிதற் கெளிதாய் முக்குண மன்றிப்
பொறி யுணர்விக்கும் பொதுவுமன்றி
யெப்பொருளுந்தோன் றுதற்கிடமன்றி
யப்பொரு ளெல்லா மறிந்திடற்குணர்வா
யொன்று மெங்கும் பரந்து நித்தியமாய்
நின்றுள வுணர்வாய் நிகழ்தரும் புருடன்
புலமார் பொருள்க ளிருபத்தைந்துள
நில நீர் தீ வளி யாகாயம்மே
மெய் வாய் கண் மூக்குச் செவிதாமே
யுறு சுவை யொளி யூறோசை நாற்றம்மே
வாக்குப்பாத பாணி பாயுருபத்த
மாக்கு மனோ புத்தி யாங்கார சித்த
முயிரெனுமான் மாவொன்றொடு மாமெனச்
செவி ஈறச் செப்பிய திறமுங் கேட்டு.

Karika Index

Figure refers to the serial number of kk.

अतिदूरात् सामीप्यात् ७
अत्र जरामरणकृतम् ५५
अध्यवसायो बुद्धिः २३
अन्तःकरणं त्रिविधम् ३३
अभिमानोऽहङ्कारः २४
अविवेक्यादिः १४
अष्टविकल्पो दैवः ५३
असदकरणात् ९
आध्यात्मिक्यश्चतस्रः ५०
इत्येष प्रकृतिकृतः ५६
उभयात्मकमत्र मनः २७
ऊर्ध्वं सत्त्वविशालः ५४
ऊहः शब्दोऽध्ययनम् ५१
एकादशेन्द्रियवधाः ४९
एतत्पवित्र्यमग्र्यम् ७०
एते प्रदीपकल्पाः ३६
एवं तत्त्वाभ्यासात् ६४
एष प्रत्ययसर्गः ४६
औत्सुक्यनिवृत्त्यर्थम् ५८
करणं त्रयोदशविधम् ३२
कारणमस्त्यव्यक्तम् १६
चित्रं यथाश्रयमृते ४१

जननमरणकरणानाम् १८
तन्मात्राण्यविशेषाः ३८
तस्माच्च विपर्यासात् १९
तस्मान्न बध्यते ६२
तस्मात्तत्संयोगात् २०
तेन निवृत्तप्रसवाम् ६५
त्रिगुणमविवेकि ११
दुःखत्रयाभिघातात् १
दृष्टवदानुश्रविकः २
दृष्टमनुमानम् ४
दृष्टा मयेत्युपेक्षकः ६६
धर्मेण गमनमूर्ध्वम् ४४
न विना भावैर्लिङ्गम् ५२
नानाविधैरुपायैः ६०
पञ्च विपर्ययभेदाः ४७
पुरुषस्य दर्शनार्थम् २१
पुरुषार्थज्ञानमिदम् ६९
पुरुषार्थहेतुकम् ४२
पूर्वोत्पन्नमसक्तम् ४०
प्रकृतेर्महान् २२
प्रकृतेः सुकुमारतरम् ६१
प्रतिविषयाध्यवसायः ५
प्राप्ते शरीरभेदे ६८
प्रीत्यप्रीतिविषाद १२
बुद्धीन्द्रियाणि चक्षुः २६
बुद्धीन्द्रियाणि तेषाम् ३४
भेदस्तमसोऽष्टविधः ४८

भेदानां परिमाणात् १५
मूलप्रकृतिरविकृतिः ३
युगपच्चतुष्टयस्य ३०
रङ्गस्य दर्शयित्वा ५९
रूपैः सप्तभिरेव ६३
वत्सविवृद्धिनिमित्तम् ५७
वैराग्यात् प्रकृतिलयः ४५
शब्दादिषु पञ्चानाम् २८
शिष्यपरम्परयागतम् ७१
सङ्घातपरार्थत्वात् १७
सत्त्वं लघु प्रकाशकम् १३
सप्तत्यां किल येऽर्थाः ७२
सम्यग्ज्ञानाधिगमात् ६७
सर्वं प्रत्युपभोगम् ३७
सात्त्विक एकादशकः २५
सान्तःकरणा बुद्धिः ३५
सामान्यतस्तु दृष्टात् ६
सांसिद्धिकाश्च भावाः ४३
सूक्ष्मा मातापितृजाः ३९
सौक्ष्म्यात्तदनुपलब्धिः ८
स्वां स्वां प्रतिपद्यन्ते ३१
स्वालक्षण्या वृत्तिः २९
हेतुमदनित्यम् १०

Quotations in CHC.

Figure refers to pages

अज्ञो जन्तुरनीशः ८८
अपाम सोमम् ३
अस्तित्वमेकत्वम् १००
कालः पचति भूतानि ८९
कुदृष्ट्याचारतः ४६
चतस्रो दुर्गतीः ४६
चतुर्वेदाः पठन्ति ८८
तम एव खलु ९८
त्यज धर्ममधर्मम् २६
नाभेरधः (चिकित्सातन्त्रे) २
दिव्यमादावेकरसम् २३
पञ्चविंशतितत्त्वज्ञः ५
पशो तव ४
पुरुषाधिष्ठितम् (षष्टितन्त्रे) २५
मज्जास्थिनी २६
यथा धान्यं सजलक्षेत्रम् ९३
युगावसानसमये ४६
येन शुक्लीकृता हंसाः ४१,८८
रजसो मिथुनम् १७
विकरिष्यति दुष्टः ४६
शक्र इन्द्रः ४
षट् शतानि नियुज्यन्ते ४
सर्वे यूयं वेदधनाः २६
स्थूलशरीरम् ५७

Printed at Tirumalai-Tirupati Devasthanams Press, Tirupati and published by the Director, Sri Venkateswara Oriental Institute.

creative commons

Attribution-NonCommercial-ShareAlike 3.0 Unported

You are free:

to Share — to copy, distribute and transmit the work

to Remix — to adapt the work

Under the following conditions:

Attribution — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

Noncommercial — You may not use this work for commercial purposes.

Share Alike — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

With the understanding that:

Waiver — Any of the above conditions can be **waived** if you get permission from the copyright holder.

Public Domain — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

Other Rights — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

Notice — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer